रं. पां.

॥ काठकोपनिषत्खंडार्थप्रारंभः ॥

॥ १ ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ समस्तगुणपूर्णायदोषदूरायविष्णवे । नमःश्रीप्राणनाथाय(भक्ताभीष्टप्रदा)वामनायेष्टदायिने । अस्याःकाठकोपनिषदोयमनचिकेतस्संवादरूपत्वाद्यमदेवोस्याऋषिः । वाक्येतरेषुपीतोदकाइत्यादिषुछंदोबद्धेष्वक्षरगणनयानुष्टुबादिछंदः । देवतातुवामनाख्योहरिर्ध्येयः । अनंतलोकाप्तिमित्यादिनाब्रह्मविद्यांवक्तुंश्रोतुःश्रद्धाजननायाख्यायिकामाहवेदपुरुषः । उशन्नित्यादिना । वाजश्रवसोनमृरूपगोत्रापत्यंवाजश्रवसः। तस्यापत्यमित्यण्प्रत्ययः । (स)उद्दालकनामा । उशन् वशकांतौग्रहिज्यावयीत्यादिनासंप्रसारणं । शत्रंतं । स्वर्गलोकमिच्छन्नित्यर्थः ।

हरिःॐ ॥ उशन्हवैवाजश्रवःसर्ववेदसंददौ । तस्यहनचिकेतानामपुत्रआस ।
तंहकुमारंसंतंदक्षिणासुनीयमानासुश्रद्धाविवेश ॥ १ ॥

सर्ववे(दसं)तसं सर्वस्वं । ददौब्राह्मणेभ्योदत्तवान् । हवैप्रसिद्धमेतत् । तस्य(ह)प्रसिद्धस्यवाजश्रवसस्यनचिकेताःनचिकेतोनामकःपुत्रःआसबभूव । नामप्रसिद्धं । अस्तेर्भूरित्येषविधिश्छांदसत्वान्नभवति । तिङंतप्रतिरूपकमव्ययंवा । तंकुमारंसंतं
बाल्येवयसिस्थितं श्रद्धाआस्तिक्यबुद्धिः विवेशप्रविवेश । श्रद्धावान्बभूवेत्यर्थः । कदेत्यतउक्तंदक्षिणास्विति । पित्राब्राह्म ॥ १ ॥
णेभ्योदक्षिणासुदीयमानास्वित्यर्थः । नानाविधजरठनिर्वीर्यगवाद्यनुपयुक्तवस्तुदानसमयेअनुपयुक्तगवादिकमस्वर्ग्यंकिमर्थं

ददातिपिता । नदेयमितिवदामीति(पुत्रस्य)बुद्धिरासीदितिभावः ॥ १ ॥ श्रद्धाविशिष्टत्वमेवव्यनक्ति । पीतोदकाइत्यादिना । पीतमेवउदकंयाभिःनतुपातव्यमस्तिताःपीतोदकाः । जग्धमेवभक्षितमेवतृणंनतुजग्धव्यमस्तियाभिस्ताःजग्धतृणाः । दुह्यतइतिदोहः । कर्मणिघञ् । क्षीरं । दुग्धएवदोहोयासां । नतुदोग्धव्यमस्तितादुग्धदोहाः । निरिंद्रियाःनिर्वीर्याःदुर्बलाइतियावत् । ताउक्तरूपागाःददत्प्रयच्छन्सपुमान्तान्लोकान्गच्छति । तेप्रसिद्धाःअनंदाःअविद्यमानसुखाःयइतिशेषः । येलोकास्तानित्येवंश्रद्धाविवेशेत्यर्थः । एवंश्रद्धाविशिष्टःसपुत्रःपितरमुवाच । हकिलेत्यर्थः ॥ २ ॥ उक्तिप्रकारमेवाह । ततेति ।

पीतोदकाजग्धतृणादुग्धदोहानिरिंद्रियाः । अनंदानामतेलोकास्तान्सगच्छतिताददत् ॥ २ ॥
सहोवाचपितरंततकस्मैमांदास्यतीति । द्वितीयंतृतीयं । तंहोवाचमृत्यवेत्वाददानीति ॥ ३ ॥
बहूनामेमिप्रथमोबहूनामेमिमध्यमः । किंस्विद्यमस्यकर्तव्यंयन्मयाद्यकरिष्यति ॥ ४ ॥

हेततहेतातमांकस्मैदास्यसीति । मांदत्वापिसर्वस्वदक्षिणाप्रतिज्ञापूरयितव्या । नैतादृशीर्गोदेहीतितद्वचनाभिप्रायोज्ञेयः । द्वितीयंतृतीयमिति । एवंप्रकारेणद्वितीयवारंतृतीयवारंचोवाचेत्यर्थः । मांकस्मैदास्यसीतिपुत्रेणत्रिवारमुक्तेसतिकुपितःपितातंपुत्रमुवाच । हेत्याश्चर्ये । त्वात्वांमृत्यवेयमायददानीत्युवाचम्रियस्वेतिशशापेत्यर्थः ॥ ३ ॥ पित्राशप्तश्चपुत्रःशापमंगीकृतवानित्याह । बहूनामिति । बहूनांमरिष्यमाणानांमध्येअहंप्रथमःसन्यममेमियामि । बहूनांमृतानांमध्येमध्यमस्सन्वायममेमि ।

तदायमस्यमयाकिंस्वित्किंवाकर्तव्यंस्यात् । यन्मयाद्यकरिष्यतितत्किमस्तिनकिमपि ॥ ४ ॥ तथापिचेद्गच्छेतिब्रूषेगच्छाम्ये
व । सिद्धस्यमरणस्यत्वयादत्तत्वात्नतेनममक्लेशइत्याह । अनुपश्येति । पूर्वेयथामृताःताननुपश्यदृष्ट्वातथापरेचमरिष्यंतीति
प्रतिपश्य क्लेशंहित्वैवयमंएमीतिपूर्वेणान्वयः । देहिनोमृतिर्नियतेत्येतदृष्टांतेनव्यनक्ति । सस्यमिवेति । सस्यंयथाकालेन प
च्यते । तथामर्त्यःमनुष्योपिपच्यते । पक्वसस्यमिवम्रियते । यमशासनानुभवानंतरंसस्यमिवपुनर्जायतेमर्त्यइत्यनुषंगः । यतो
जंतोर्जन्ममृतीनियते ततोनियतमृतेरेवत्वयादत्तत्वात् । नममततःक्लेशइतिभावः ॥ ५ ॥ अथयमलोकंगतोनचिकेताः ।

अनुपश्ययथापूर्वेप्रतिपश्यतथापरे । सस्यमिवमर्त्यःपच्यतेसस्यमिवजायतेपुनः ॥ ५ ॥
वैश्वानरःप्रविशत्यतिथिर्ब्राह्मणोगृहान् । तस्यैतांशांतिंकुर्वंतिहरवैवस्वतोदकं ॥ ६ ॥

तदायमोऽन्यलोकंगत्वास्थितोभूत् । यमभार्ययाकृतामतिथिपूजांयजमानाभावान्नगृह्णामीत्युक्त्वादिनत्रयपर्यंतमुपवासेनतद्गृ
हएवस्थितवान् । ततोयमेचागतेयमंप्रतिभार्योक्तिप्रकारमाह । वैश्वानरइति । अतिथिःब्राह्मणोवैश्वानरस्सन्गृहान्प्रविशति ।
गृहेष्वग्निप्रवेशोयथातथाब्राह्मणोब्रह्मज्ञानीअतिथिरूपोगृहमागतोऽसत्कृतश्चेद्दहत्येवेत्यर्थः । तथाचोक्तंषष्ठस्कंधे । अग्नेरभ्या
गतोमूर्तिरिति । तस्याग्निरिवप्रविष्टस्यातिथेरेतां सइन्द्रोजोयोगृहवेददात्यन्नकामायचरतेकृशायेत्यादिषूक्तांशांतिंकुर्वंतिमहां
तोगृहिणः । अतोहेतोः । वैवस्वतविवस्वतःपुत्रसूर्यपुत्र । उदकंउदकाद्यतिथिपूजां । अस्मैब्राह्मणायहरकुर्वितिभार्योवाच

मंप्रतीत्यर्थः ॥ ६ ॥ अतिथिपूजायाअकृतावनिष्टमाह । आशेति । आशाचप्रतीक्षाचआशाप्रतीक्षे । प्राप्तवस्तुविषयेच्छाह्या शा । अप्राप्तवस्तुविषयेच्छाप्रतीक्षेतिभावः । संगतंसुहृत्संगतिं । सूनृतांजनकर्तृकसाधुवार्तांच । इष्टंचपूर्तंचइष्टापूर्ते । अन्येभ्योपिद्दश्यतइतिदीर्घः । इष्टंयजनं पूर्ततटाकादि । पुत्रेति । पुत्रान्पशूंश्चेत्यर्थः । यस्यगृहेब्राह्मणोऽनश्नन्वसतितस्ये तिशेषः । अल्पमेधसोल्पबुद्धेस्तस्यपुरुषस्यआशाप्रतीक्षादिकंपूर्वार्धोक्तंसर्वमेतत् अनशनेनब्राह्मणस्यगृहेवस्थानंकर्तृ । वृंक्ते

आशाप्रतीक्षेसंगतंसूनृतांचेष्टापूर्तेपुत्रपशूंश्चसर्वान् ।
एतद्वृङ्क्तेपुरुषस्याल्पमेधसोयस्यानश्नन्वसतिब्राह्मणोगृहे ॥ ७ ॥
तिस्रोरात्रीर्यद्वात्सीर्गृहेमेअनश्नन्ब्रह्मन्नतिथिर्नमस्यः ।
नमस्तेस्तुब्रह्मन्स्वस्तिमेस्तुतस्मात्प्रतित्रीन्वरान्वृणीष्व ॥ ८ ॥

वृजीवर्जनेश्नम्विकरणंवर्जयति । सर्वंनाशयतीत्यर्थः ॥ ७ ॥ एवंभार्योक्तेनयमेनतस्मैअर्घ्यादिपूजांकृत्वानचिकेतसंप्रतिउक्त वचनप्रकारमाह । तिस्रइति । हेब्रह्मन्नमस्योनमनयोग्योऽतिथिःभवाननश्नन्अभुंजानःसन्मेगृहेतिस्रःरात्रीःदिनत्रयंयद वात्सीत् वासमकार्षीदितियत्तस्मात्प्रतितस्यप्रतीकारायत्रीन्वरान्वृणीष्व । वृञ्संभक्तौ संभजस्वस्वीकुरु । तेतुभ्यंनमोस्तु ।

ब्रह्मन्मेमह्यंस्वस्ति । अव्ययमेतत् मंगलमस्तु । नमःस्वस्तीत्यादिनाचतुर्थी ॥ ८ ॥ एवंयमेनोक्तोनचिकेताःप्रथममेकंवरं तावद्वृणुतइत्याहवेदपुरुषः । शांतेति । हेमृत्योगौतमोममपिताशांतसंकल्पःमदनिष्टेशांतःसंकल्पोयस्यसतथा । सुमनाः शोभनमनस्कःयथास्यात् । माभिमांप्रति । वीतमन्युःअपगतकोपःयथास्यादितिप्रत्येकमन्वेति । त्वत्प्रसृष्टंत्वयाप्रेषितं माभि मांप्रति प्रतीतःप्रत्यभिज्ञानवान्यथावदेत् । एतत्एतंवराणांप्रथमंवरंवृणे इत्याहनचिकेतायमंप्रतीत्यर्थः ॥ ९ ॥

शांतसंकल्पःसुमनायथास्याद्वीतमन्युर्गौतमोमाभिमृत्यो ।
त्वत्प्रसृष्टंमाभिवदेत्प्रतीतएतत्त्रयाणांप्रथमंवरंवृणे ॥ ९ ॥
यथापुरस्ताद्भविताप्रतीतऔद्दालकिरारुणिर्मत्प्रसृष्टः ।
सुखंरात्रीःशयितावीतमन्युस्त्वांददृशिवान्मृत्युमुखात्प्रमुक्तं ॥ १० ॥

इत्युक्तोयमोवरंतथैवदत्तवानित्याह । यथेति । औद्दालकिःउद्दालकस्यापत्यंऔद्दालकिः । अरुणायाअपत्यंआरुणिः । स्त्री भ्योढगितिनाश्रितं । भवान्मत्प्रसृष्टःमत्प्रेषितस्सन्पुरस्तात्ग्रामांतरादागतोयथातथाप्रतीतःपित्राप्रत्यभिज्ञातोभविताभविष्य ति । रात्रीःसुखंशयिताशयानोभविता तवपितावीतमन्युस्सन्मृत्युमुखाद्यममुखात्प्रमुक्तंत्वांददृशिवान्दृष्टवान्भवेदितियमः

प्रथमंवरंदत्तवानित्यर्थः ॥ १० ॥ स्वर्ग्याग्निस्वरूपज्ञानलक्षणंद्वितीयंवरंयाचितुंतद्याच्ञायांहेतुतयास्वर्ग्याग्निज्ञानफलस्वर्गश ब्दितविष्णुलोकस्वरूपमाह । स्वर्गइति । स्वर्गेलोकेस्वर्गशब्दितेभगवल्लोकेकिंचनकिमपिभयंनास्ति । तत्रलोकेत्वंचनासि । शि क्षकस्सन्निितिभावः । नजरयाबिभेतितल्लोकंगतइतियोज्यं । अशनायापिपासेउभेतीर्त्वाशोकातिगःशोकानतिक्रांतस्सन्मो दते । सुखमनुभवति । स्वर्गलोकइतिपुनरुक्तिरादरार्था । यद्वानायंलोकःविष्णुलोकः । किंतुप्रसिद्धस्वर्गलोकएवेति ज्ञाप

स्वर्गेलोकेनभयंकिंचनास्तिनतत्रत्वंनजरयाबिभेति ।
उभेतीर्त्वाअशनायापिपासेशोकातिगोमोदतेस्वर्गलोके ॥ ११ ॥
सत्वमग्निंस्वर्ग्यमध्येषिमृत्योप्रब्रूहितंश्रद्दधानायमह्यं ।
स्वर्गलोकाअमृतत्वंभजंतेएतद्द्वितीयेनवृणेवरेण ॥ १२ ॥

नायपुनरुक्तिः । प्राप्यस्वर्गंतत्रभयातिगः । उष्यमंन्वंतरंकालमित्यादिभाष्योक्तेः ॥ ११ ॥ एवंस्वर्ग्याग्निज्ञानफलंनिरूप्य स्वर्ग्याग्निंपृच्छतिसत्वमिति । हेमृत्योसत्वंस्वर्ग्यंउक्तरूपस्वर्गसाधनंअग्निंअग्निशब्दितेष्टकचितस्थमग्र्यत्वादिगुणयुक्ततयाअ ग्निनामकंहरिंअध्येषिजानासि । तंचितिस्थमग्निनामकंहरिंश्रद्दधानायमह्यंब्रूहि । कुतःनहिस्वर्ग्यत्वमात्रेणतद्वचनमावश्य कमित्यतआह । स्वर्गेति । स्वर्गोलोकोयेषांतेतथोक्ताः । मन्वंतरंस्वर्गलोकेस्थास्यंतःपश्चादमृतत्वंमुक्तिंभजंतेप्राप्नुवंति ।

एतत् एतं द्वितीयेन वरेण द्वितीयं वरं वृण इत्यर्थः ॥ १२ ॥ इति याचितो यमः प्रत्युवाचेत्याह । प्रतइति । हे नचिकेतः स्वर्ग्यं
स्वर्गसाधनं अग्निं चितस्थं अग्निनामकं हरिं प्रजानन् अहं ते तुभ्यं प्रब्रवीमि प्रवच्मि । तदु तदेव त्वया पृष्टं मयोच्यमानं अग्निनामकं चि
तस्थहरिस्वरूपमेव मे मत्सकाशात् निबोध निबुध्यस्व जानीहि । प्रतिज्ञातं स्वर्ग्याग्निस्वरूपमुक्तवानित्याह । अनंतेति ।
अनंतलोकाप्तिं अनंतस्य विष्णोर्लोकस्याप्तिमाप्तिसाधनं । अथो किंच । प्रतिष्ठां सर्वलोकप्रतिष्ठाहेतुं । गुहायां सर्वप्राणिहृद

प्रतेब्रवीमितदुमेनिबोधस्वर्ग्यमग्निंनचिकेतःप्रजानन् ।
अनंतलोकाप्तिमथोप्रतिष्ठांविद्धित्वमेतंनिहितंगुहायां ॥ १३ ॥
लोकादिमग्निंतमुवाचतस्मैयाइष्टकायावतीर्वायथावा ।
सचापितत्प्रत्यवदद्यथोक्तमथास्यमृत्युःपुनराहतुष्टः ॥ १४ ॥

यगुहायां । निहितं नितरां स्थितं ॥ १३ ॥ सर्वलोकानामादिं कारणभूतं तमेतमग्निं चितिस्थं अग्निनामकं हरिं त्वं विद्धि जानीहि इ
त्युवाच यमः तस्मै नचिकेतसे अन्यदप्युक्तवानित्याह । याइष्टकाइति । याः इष्टकादेवताः यावतीर्वा यावत्संख्याकाः षष्ट्युत्तरशत
त्रयसंख्याकाः यथा वा याहृशपरिमाणा वाताः उवाचेत्यन्वयः । षष्ट्युत्तरशतत्रयसंख्याके ष्टकादेवतां विष्णुं इष्टकासंख्यां परिमा
णं चोवाचेत्यर्थः । इष्टकादेवतायाः विष्णोरेकत्वेपि इष्टकानां बहुत्वाद्वा रूपबाहुल्येन वा बहुवचनं याइष्टकाइति ज्ञेयं । सचापिन

चिकेताअपियथोक्तं यमेनतत्प्रत्यवदत्‌अनूदितवान्‌ । अथअनुवादानंतरंअनूदितत्वाद्धेतोर्वाअस्यनचिकेतसःसंतुष्टोमृत्युर्य मःपुनराह ॥ १४ ॥ किमाहेत्यतआह । तमिति । तंनचिकेतसंप्रीयमाणःप्रीतिमान्‌सन्‌महात्मामहामनाःयमोब्रवीदित्युक्ता नुवादआदरार्थः । अद्यइदानींभूयःपुनःवरत्रयादन्यमितियावत्‌ । वरंइहचितिविषयेतवददामीत्यब्रवीदित्यर्थः । तंवरमाह । तवैवेति । अयमग्निःइष्टकचितरूपोऽग्निः । तवनाम्नैवनाचिकेताग्निरित्येवंरूपेणभविताभविष्यतिभवत्वितिव्यत्ययोवा । अनेक

तमब्रवीत्प्रीयमाणोमहात्मावरंतवेहाद्यददामिभूयः ।
तवैवनाम्नाभवितायमग्निःशृंकांचेमामनेकरूपांगृहाण ॥ १५ ॥
त्रिनाचिकेतस्त्रिभिरेत्यसंधिंत्रिकर्मकृत्तरतिजन्ममृत्यू ।
ब्रह्मजज्ञंदेवमीड्यंविदित्वानिचाय्येमांशांतिमत्यंतमेति ॥ १६ ॥

रूपांबहुरूपांस्वर्णमयीमितियावत्‌ । बहुरूपंचपुरुटंकार्तस्वरमितीर्यतइत्युक्तेः । शृंकांकंठमालांचइमांगृहाणेत्यब्रवीदित्यन्वयः ॥१५॥ तवैवनाम्नाभवितायमग्निरित्युक्तंतथैवव्यवहरन्‌तदनुष्ठातुःफलमाह । त्रिनाचिकेतइति । नचिकेतसोयंनाचिकेतःनाचिके तसइतिवक्तव्येछांदसःसलोपः । त्रयोनाचिकेतायस्यासौत्रिनाचिकेतः । त्रिवारानुष्ठितनाचिकेतनामकाग्निचयनःपुमानित्यर्थः । त्रिभिर्वेदैःसंधिंसंधानंएत्यप्राप्ययोवर्ततेवेदत्रयाविरुद्धोवर्तते वेदत्रयोक्तमार्गेणभगवत्तत्वादिकंजाननिितियावत्‌ । त्रिभिरेत्यसं

धिमित्यस्यपूर्वत्रोत्तरत्रचान्वयः।त्रिकर्मकृत्यज्ञदानतपःकर्ता। जन्ममृत्यूतरतिमुक्तोभवतीत्यर्थः।किमेतावतैवत्रिनाचिकेतत्वंत्रि
कर्मकृत्त्वमात्रेणमुक्तोभवतीत्यतःत्रिभिरेत्यसंधिमित्युक्तंभगवत्तत्वादिज्ञानमप्यावश्यकमितिभावेनतद्व्यनक्ति। ब्रह्मजज्ञमिति।
ब्रह्मवेदःतत्रव्यक्तत्वाद्ब्रह्मजोविष्णुः।सप्तम्यांजनेर्डः। जानातीतिज्ञः(सर्वज्ञः)। इगुपधज्ञाप्रीकिरःकः।ब्रह्मजश्चासौज्ञश्चब्रह्मजज्ञः
तं। देवंक्रीडादिगुणविशिष्टं। ईड्यंब्रह्मादिभिःस्तुत्यं। निचाय्यविचार्य। विदित्वासाक्षात्कृत्य। इमांवेदाद्युक्तांपूर्वोत्तरजन्ममृ

त्रिनाचिकेतस्त्रयमेतद्विदित्वायएवंविद्वांश्चिनुतेनाचिकेतं ।
समृत्युपाशान्पुरतःप्रणोद्यशोकातिगोमोदतेस्वर्गलोके ॥ १७ ॥
एषतेग्निर्नाचिकेतःस्वर्ग्योयमवृणीथाद्वितीयेनवरेण ।
एतमग्निंतवैवप्रवक्ष्यंतिजनासस्तृतीयंवरंनचिकेतोवृणीष्व ॥ १८ ॥

त्यूत्तरणरूपांवक्ष्यमाणरूपांवाशांतिंअत्यंतंयथाभवतितथाएतिप्राप्नोतीति ॥१६॥ उक्तमेवार्थंपुनर्विशदमाह। त्रिनाचिकेतइति।
योविद्वान्त्रिनाचिकेतःत्रिवारंनाचिकेताग्निमनुतिष्ठन्एतत्त्रयंयाइष्टकाइत्यादिनोक्तंविष्णुरूपेष्टकादेवतेष्टकासंख्येष्टकापरि
माणरूपंत्रयंविदित्वाएवंज्ञातप्रकारेणनाचिकेताग्निंचिनुते। श्येनकूर्माद्याकारेणेष्टकादिभिःवेदिंकरोति सपुमान्पुरतःपुरस्थिता ॥ ५ ॥
न्मृत्युपाशान्यमपाशान्प्रणोद्यप्रणुद्यनिरस्यशोकातिगःशोकानतिक्रांतःस्वर्गलोकेहरिलोकेमोदते। सुखमनुभवति॥१७॥ उपसं

हरति। एषइति। द्वितीयेनवरेणद्वितीयंवरंयमवृणीथावृतवानसि । एषस्वर्ग्यःस्वर्गसाधनःनाचिकेतनामकोऽग्निःतेकथितइति
योज्यं । प्रीत्यास्वदत्तंवरंनिर्धारयति । एतमग्निंतवैव त्वत्संबंधिनमेव त्वन्नाम्नैवेतियावत्। जनासोजनाः। आज्जसेरसुक्। प्रव
क्ष्यंतिप्रवदिष्यंतीतियमोवक्ति । तृतीयंवरमिति । वृणीष्वेत्युवाचयमइत्यर्थः ॥ १८॥ तृतीयवरवरणप्रकारमाह । येयमिति ।
प्रेतेमृतपुरुषेमुक्तेचमनुष्येनियामकत्वेनभगवानस्तीतिएकेज्ञानिनोवदंतिनास्तीत्यज्ञाः। अतोविप्रतिपत्तेःममजातायेयंविचिकि

येयंप्रेतेविचिकित्सामनुष्येअस्तीत्येकेनायमस्तीतिचैके ।
एतद्विद्यामनुशिष्टस्त्वयाहंवराणामेषवृतस्तृतीयः ॥ १९ ॥
देवैरत्रापिविचिकित्सितंपुरानहिसुज्ञेयोणुरेषधर्मः ।
अन्यंवरंनचिकेतोवृणीष्वमामोपरोत्सीरतिमासृजैवं ॥ २० ॥

त्सासंदेहःएतद्विचिकित्साविषयंमृतमुक्तजीवयोःप्रेरकस्वरूपंअहंत्वयानुशिष्टःसन्उपदिष्टस्सन्विद्यांजानीयां । वराणांमध्येए
षवरःविचिकित्साविषयमृतमुक्तप्रेरकस्वरूपोपदेशनप्रार्थनरूपःतृतीयोमयावृतइतिनचिकेतायममुवाचेतियोज्यं ॥ १९ ॥ एवं
नचिकेतसाप्रार्थितोयमःअणोरणीयानित्यादिनाद्वितीयाध्यायेमुक्तजीवनियामकस्वरूपं । यथामरणंप्राप्येत्यादिनापंचमेमृत
जीवनियामकंचवक्ष्यन्तृतीयप्रश्नविषयप्रेतस्येश्वरस्वरूपस्यातिदुर्ज्ञेयत्वादिमाहात्म्यमाह। देवैरिति । यद्यपिप्रतेब्रवीमीत्यादि

नोक्तद्वितीयवरोक्तिरपिइष्टकचिताग्निस्थभगवद्विषयैव । अथापितज्ज्ञानेनमुक्तौसुखातिशयोनतुमुक्तिः । सातुप्रेतप्रेरकतद्गु णादिमाहात्म्यज्ञानादेवेतिअस्यदुर्ज्ञेयत्वोक्तिः । देवैरप्यत्रत्वत्कृतप्रश्नविषयेपुरापूर्वंविचिकित्सितंसंदिग्धमासीत् । तेपिसंदे हवंतोऽभवन् । कुतः । नहिसुज्ञेयःहियतःसुखेनज्ञेयोनभवति । तत्किमित्यतआह । अणुरेषधर्मइति । अणुःसूक्ष्मःअव्यक्त स्वभावः । धारकत्वाद्धर्मोभगवान् । धृधारणेमप्रत्ययः । अतःकारणात्हेनचिकेतःअन्यंवरंप्रेतनियामकोपदेशवरादन्यं

देवैरत्रापिविचिकित्सितंकिलत्वंचमृत्योयन्नसुज्ञेयमात्थ ।
वक्ताचास्यत्वादृगन्योनलभ्योनान्योवरःस्तुल्यएतस्यकश्चित् ॥ २१ ॥
शतायुषःपुत्रपौत्रान्वृणीष्वबहून्पशून्हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनंवृणीष्वस्वयंचजीवशरदोयावदिच्छसि ॥ २२ ॥

वरंवृणीष्व । मामांमोवरोत्सीःउपरोधंएतत्प्रश्नविषयंब्रूहीतिनिर्बंधंनकुर्वितियमउवाचेत्यर्थः । एवंयमेनोक्तोनचिकेतावक्ति । मातिसृजैवमिति । एवमुक्तप्रकारेणमातिसृजअतिसर्जनंपरित्यागंमाकार्षीः ॥ २० ॥ कुतःहेमृत्योत्वंचत्वमपियद्यस्माद्देवैरप्य त्रविचिकित्सतं । सुज्ञेयंचनेतिआत्थवदसि । वक्ताचत्वादृगन्यःअस्यमत्प्रश्नविषयस्यनलभ्यः । एतस्यकश्चित्तुल्योवरोऽन्योना स्तितस्मादेतदेवब्रूहीत्यर्थः ॥ २१ ॥ नानाप्रलोभैरलुब्धएवास्यांवक्ष्यमाणविद्यायामधिकारीतिभावेनयमोगुह्यंवरंयाचमानंप्र

लोभयति । शतायुषइत्यादिना । शतमायूंषीत्यर्थः । शतायुषइतिबहुव्रीहिर्वापुत्रपौत्रानित्यस्यविशेषणं । हस्तिहिरण्यं । हस्तिनोहिरण्यंच । द्वंद्वैकवद्भावः । भूमेर्महदायतनं । अतिविस्तीर्णभूखंडं । यावदिच्छसियावत्कालंजीवितुमिच्छसितावतीःशरदश्च शरदोपिस्वयंजीव ॥ २२ ॥ एतत्तुल्यंत्वत्प्रार्थितवरतुल्यंवरंकंचनयदिमन्यसे । तद्वावृणीष्ववित्तंचिरजीविकांजीवनहेतुंचवृणीष्वेत्यादरात्प्रागुक्तस्यपुनरुक्तिः । हेनचिकेतःमहाभूमौपुण्यभूमौएधिभव । ध्वसोरेद्धावभ्यासलोपश्चेत्यस्तेरूपं । पुण्यभूमिज

एतत्तुल्यंयदिमन्यसेवरंवृणीष्वबित्तंचिरजीविकांच ।
महाभूमौनचिकेतस्त्वमेधिकामानांत्वाकामभाजंकरोमि ॥ २३ ॥
येयेकामादुर्लभामर्त्यलोकेसर्वान्कामांश्छंदतःप्रार्थयस्व ।
इमारामाःसरथाःसतूर्यानहीदृ(शीलं)शालंभनीयामनुष्यैः ।
आभिर्मत्प्रत्ताभिःपरिचारयस्वनचिकेतोमरणंमानुप्राक्षीः ॥ २४ ॥

न्नंवावृणीष्व । एववृद्धावित्यस्यवारूपमेतत् । वर्धस्वेत्यर्थः । महान्भूमावितिक्वचित्पाठः । तदातुएधिभवेत्यर्थः । कामानांकाम्यमानानांमध्येत्वात्वांकामभाजंकामितभाजंकरोति ॥ २३ ॥ तदेवविशदमाह । येयइति । मर्त्यलोकेभूलोकेमानुषदेहेवा । छंदतःस्वेच्छानुसारेणेत्यर्थः । इमाःरूपशीलादिगुणवतीःमल्लोकस्थाइतिवा । रामाःस्त्रियःरामाणांविशेषणंसरथाःसतुर्याःसोप

स्कराइत्यर्थः । ईदृशीसंपत्मनुष्यैःलंभनीयाप्राप्यानहिभवति । तस्मादुक्तसंपदमेवप्रार्थयस्वेत्यर्थः । किंकार्यंरामाभिरित्यत आह । आभिःरथाद्युपेताभिःस्त्रीभिःमत्प्रत्ताभिःमद्दत्ताभिःहेनचिकेतःपरिचारयस्वपरिचर्यस्वसेव्योभवेतियावत् । मरणंमरण वंतंमृतस्थभगवंतंमानुप्राक्षीःनैवपृच्छेत्यर्थः । तस्यातिगोप्यत्वादितिभावः ॥ २४ ॥ एवंप्रलोभितोनचिकेताःशतायुषइत्यादेः उत्तरमाह । श्वइत्यादिना । हेअंतकमृत्योमर्त्यस्यमनुष्यस्ययदेतत्यएतेपुत्रादयःव्यत्ययात् । तेश्वःपरेद्युःअभावाःभवंतीति

श्वोभावामर्त्यस्ययदंतकैतत्सर्वेंद्रियाणांजरयंतितेजः ।
अपिसर्वंजीवितमल्पमेवतवैववाहास्तवनृत्तगीतं ॥ २५ ॥
नवित्तेनतर्पणीयोमनुष्योलप्स्यामहेवित्तमद्राक्ष्मचेत्त्वां ।
जीविष्यामोयावदीशिष्यसित्वंवरस्तुमेवरणीयःसएव ॥ २६ ॥

भावाःनभावाःअभावाःअसंतःअस्थिराइतियावत् । तद्रक्षणार्थायासेनसर्वेंद्रियाणांतेजोवीर्यंजरयंतिअपगमयंतिच । अतःकिंपु त्रपौत्रादिभिरितिभावः । यदपिस्वयंचजीवेत्याद्युक्तंतस्योत्तरमाह । अपीति । सर्वमपिजीवितमल्पमेव । उत्तरावध्युपेतमेव । नहिमुक्ताविवउत्तरावधिशून्यमायुरस्तीतिभावः । इमारामाइत्यस्योत्तरं । तवैवेति । वाहाःरथादिवाहनानितवैवसंतु । नृत्त गीतंद्वंद्वैकवद्भावःरामाभिःक्रियमाणंतवास्तु ॥ २५ ॥ वृणीष्ववित्तमित्यादेरुत्तरं । नवित्तेनेति । वित्तेनमनुष्यःनतर्पणीयो ॥ ७ ॥

नाप्यायनीयः । कुतइत्यतःत्वादृशेदेवेदृष्टेवित्तायुषोरनुषंगसिद्धत्वान्नतेपृथक्प्रार्थनीयाइत्याह ॥ लप्स्यामहइति । त्वांचेदद्रा क्ष्मदृष्टवंतःस्मःतर्हिवित्तंलप्स्यामहेत्वंयावदीशिष्यसिईशऐश्वर्येममयावदायुषःईश्वरोभविष्यसितावत्कालंजीविष्यावयंतवायु षःकर्तृत्वादितिभावः । परस्मैपदंछांदसं । तर्हिकिंकामंयाचसइत्यतआह । वरस्त्विति । सएवप्राग्याचितएवेत्यर्थः । तुशब्दः अस्यवरस्यसर्वातिशयद्योतकः ॥ २६ ॥ लप्स्यामहइत्यादिनोक्तमेवविवृणोति । अजीर्यतामिति । हेप्रजानन्विद्वन्अजीर्य तां । जृष्वयोहानौ । उपलक्षणं । वयःप्रभृतिसंपत्तिमताममृतानांदेवानांसकाशमितिशेषः । उपेत्यप्राप्यजीर्यन्मर्त्यःक्कअधस्थो

अजीर्यताममृतानामुपेत्यजीर्यन्मर्त्यःक्वाधस्तःप्रजानन् ।
अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घेजीवितेकोरमेत ॥ २७ ॥
यस्मिन्निदंविचिकित्संतिमृत्योसांपरायेमहतिब्रूहिनस्तत् ।

(प्रकृ)प्रकृष्टश्चक्वकुत्रनकुत्रापिकिंतुमहानेवअजीर्यन्नेवास्तइत्यर्थः । दीर्घजीवनस्यदुःखहेतुत्वाच्चनतत्प्रार्थ्यमित्याह । अभिध्या यन्निति । वर्णरतिप्रमोदान्वर्णोब्राह्मणादिःदेहगतशोभाविशेषोवा । रतिःविषयानुभवजंसुखं । प्रमोदःप्रकृष्टविषयानुभवजं सुखं । एतान्पूर्वानुभूतान्विषयान्इदानींनिवृत्तान्अभिध्यायन्स्मरन्अतिदीर्घेजीवितेकोरमेतनकोपीत्यर्थः । वयोधिकत्वे जराद्यापत्त्याभोगशक्तेरभावात्प्रत्युतक्लेशएवभवेदितिभावः ॥ २७ ॥ तर्हिकिमाकूतंतवेत्यतआह । यस्मिन्निति । यस्मिन्वि

षयेइदंइत्थंप्रेतप्रेरकतयाअस्तिनवेतिविचिकित्संतिसंदिहतेजनाः । तत्तुतदेवप्रेतप्रेरकस्वरूपं । हेमृत्योमहतिसांपरायेमुक्तौनि
मित्तसप्तमी । मोक्षार्थंनोऽस्मभ्यंब्रूहिउपदिश । सांपरायपदस्यश्रेयोमात्रसाधारण्यात्मुक्त्यर्थत्वलाभायमहतीत्युक्तं । योयं
वरःप्रेतप्रेरकस्वरूपोक्तिप्रार्थनरूपःगूढंगूढत्वंगोप्यतामनुप्रविष्टःप्राप्तः । तस्माद्वरादन्यंवरंनचिकेतानवृणीतइतिस्वात्मानमेव
नामनिर्देशेनाह ॥ इतिकाठकार्थसंग्रहेप्रथमाध्यायस्यप्रथमावल्ली ॥ १ । १ ॥ दीयमानमपिपुत्रादिकामंहित्वाब्रह्मविद्यांया

योयंवरोगूढमनुप्रविष्टोनान्यंतस्मान्नचिकेतावृणीते ॥ २८ ॥ ७ ॥

इतिप्रथमाध्यायस्यप्रथमावल्ली ॥ १ । १ ॥

अन्यच्छ्रेयोन्यदुतैवप्रेयःतेउभेनानार्थेपुरुषंसिनीतः ।
तयोःश्रेयआददानस्यसाधुभवतिहीयतेर्थाद्यउप्रेयोवृणीते ॥ १ ॥

चमानःत्वंप्रशस्तोसीतितंसत्वंप्रियानित्यादिनाप्रशंसितुंब्रह्मविद्यायामोचकत्वंपुत्रादिकामस्यबंधकत्वंतद्भाजोःस्तुतिनिंदेज्ञाज्ञ
योःस्थितीचसार्धमंत्रद्वयेनाह यमः । अन्यदित्यादिना । श्रेयःप्रशस्ततमंब्रह्मज्ञानंअन्यत् । प्रेयःउतप्रियतमंदारापत्यादिका
म्यमानंवस्त्वपिअन्यदिव इतिचजानतांदारापत्यादिरूपप्रेयसोपिसद्धर्मद्वाराश्रेयस्त्वमेवेतिसूचनायएवशब्दः । द्वयोरन्योन्य
त्वंनामकिमित्यतःऐहिकामुष्मिकसुखहेतुत्वंतदित्याह । तेउभेइति । तेउभेनानार्थेभिन्नप्रयोजनके । पुरुषंदेहिनंसिनीतः ।

बध्नीतः । षिञ्बंधनइतिधातोः । पुरुषस्यद्वेप्रसक्तेइत्यर्थः । ततःकिमित्यतआह । तयोरिति । श्रेयःप्रेयसोर्मध्येश्रेयोब्रह्मविद्यां आददानस्यउपासीनस्यसाधुभद्रंभवमोचनंभवति । यउयएवप्रेयःदारापत्यादिकामंवृणीतेसोर्थात्परमपुरुषार्थात्हीयतेहीनोभ वतिभवपाशएवबद्धोभवतीत्यर्थः ॥ १ ॥ उक्तानुवादपूर्वकंज्ञानिनःस्थितिमाह । श्रेयश्चेति । एतइत्यत्रआइतइतिपदच्छेदः । आङ्पूर्वस्यइण्गतावित्यस्यरूपं । प्रागुक्तरूपंश्रेयश्चप्रेयश्चद्वेमनुष्यंएतःप्राप्यतिष्ठतःधीरोज्ञानी । तौश्रेयःप्रेयःशब्दितौब्रह्मवि

श्रेयश्चप्रेयश्चमनुष्यमेतस्तौसंपरीत्यविविनक्तिधीरः ।
श्रेयोधीरोभिप्रेयसोवृणीतेप्रेयोमंदोयोगक्षेमान्वृणीते ॥ २ ॥
सत्वंप्रियान्प्रियरूपांश्चकामानभिध्यायन्नचिकेतो(न्यत्प्राक्षीः)त्यस्राक्षीः ।
नैतांशृंकांवित्तमयीमवाप्तोयस्यांमज्जंतिबहवोमनुष्याः ॥ ३ ॥

द्याकामौ । संपरीत्यसम्यक्ज्ञात्वाविविनक्ति । श्रेयोमोचकंप्रेयोबंधकमितिविवेचयति । एवंविवेकंकृत्वाकिंकरोतीत्यतआह । श्रेयइति । धीरोविवेकीप्रेयसःप्रियतमान्दारापत्यादिकामान्अभि निपातानामनेकार्थत्वादवज्ञायेत्यर्थः । श्रेयोब्रह्मविद्यांवृ णीते । मंदोविवेकहीनःयोगक्षेमान्अप्राप्तकामप्राप्तिर्योगः । तस्यानपगमेनस्थिरत्वंक्षेमः । तद्रूपान्प्रेयसोवृणीते ॥ २ ॥ यत्प्र शंसार्थंउपोद्घातउक्तस्तामाह । सत्वमिति । हेनचिकेतःसत्वंमयाप्रलोभितोपित्वंप्रियान्दारापत्यादीन्प्रियरूपांश्चगृहारामक्षेत्रा

दीँश्चकामान्काम्यमानान्अभिध्यायन्अस्थिरतयामन्वानः । अन्यत्ब्रह्मस्वरूपंप्राक्षीःअप्राक्षीः । अडभावःछांदसः । पृष्टवा
नसिअत्यस्राक्षीरितिपाठेत्यक्तवानभूरित्यर्थः । वित्तमयींसुवर्णमयीमेतांकंठधारणयोग्यांश्रृंकांश्रृंखलांनावाप्तःनस्वीकृतवान् ।
श्रृंकेयमतिश्लाघ्येत्याह । यस्यांमज्जंतिआसक्ताःभवंतिबहवोमनुष्याःतादृशीमपिमयादीयमानांनगृहीतवान्अतस्त्वंप्रशस्तइ
तिभावः ॥ ३ ॥ पूर्वंयोगक्षेमानितिप्रियान्प्रियरूपांश्चेतिप्रेयस्स्वरूपंकिंचित्स्पष्टीकृतं । श्रेयस्स्वरूपंतुनस्पष्टं । श्रेयआददा

दूरमेतेविपरीतेविषूचीअविद्यायाचविद्येतिज्ञाता ।
विद्याभीप्सितंनचिकेतसंमन्येनत्वाकामाबहवोलोलुपंतः ॥ ४ ॥
अविद्यायामंतरेवर्तमानाःस्वयंधीराःपंडितंमन्यमानाः ।
दंद्रम्यमाणाःपरियंतिमूढाअंधेनैवनीयमानायथाधाः ॥ ५ ॥

नस्येतिसामान्यतउक्तेः । अतस्तदुभयंस्पष्टयन्नचिकेतसंस्तौति । दूरमिति । याऽविद्याविद्याभिन्नाऐहिकसुखसाधनत्वे
नज्ञातायाचविद्येतिज्ञाताएतेदूरंअन्योन्यंविदूरतोवर्तमाने । तदेवाह । विपरीतेइति । परस्परंविरुद्धे । तद्व्यनक्ति । विषूची
विषूचीनेविरुद्धफलहेतू । नचिकेतसंत्वात्वांविद्याभीप्सितंविद्याभिकांक्षिणंमन्येजानामि । बहवःकामाःत्वात्वांलोलुपंतःलो
लुपयंतःअपेक्षांजनयंतःनवर्ततइत्यर्थः । कामैःप्रलुब्धस्त्वंनभवसीतियावत् ॥ ४ ॥ श्रेयश्शब्दितविद्याकामःश्रेयानितिभावे ॥ ९ ॥

नाविद्याशब्दितप्रेयस्कामान्निंदतियमः। अविद्यायामिति । ब्रह्मविद्येतरस्मिन्नंतरेअविद्यायामध्येवर्तमानाःकेवलंतन्मात्रोपास
काःस्वयंधीराःस्वयमेवधीमंतइतिवदंतःआत्मानंपंडितंमन्यमानाःजानंतःदंद्रम्यमानाःवक्रगतयः । द्रमेःकुटिलगत्यर्थत्वात् ।
मूढाःकामभोगेनमोहिताः । परियंतिपरितःस्वर्गनरकादीन्गच्छंति । तत्रदृष्टांतःअंधेनैवेति ॥ ५ ॥ कुतएवंफल्गुकामेष्वास
क्तिरित्यतःश्रेयस्साधनादर्शनादित्याह। नसांपरायइति । सांपरायःश्रेयस्साधनीभूतोभगवान्नभातिनतज्ज्ञानविषयोभवति।

नसांपरायःप्रतिभातिबालंप्रमाद्यंतंवित्तमोहेनमूढं ।
अयंलोकोनास्तिपरइतिमानीपुनःपुनर्वशमापद्यतेमे ॥ ६ ॥
श्रवणायापिबहुभिर्योनलभ्यःशृण्वंतोबहवोयन्नविद्युः ।
आश्चर्योस्यवक्ताकुशलोस्यलब्धाआश्चर्योज्ञाताकुशलानुशिष्टः ॥ ७ ॥

कुतोनभातीत्यतउक्तं । बालमिति । बालसदृशं । वित्तमोहेनमूढंअतएवप्रमाद्यंतंप्रमादोपेतंप्रतिनभातीत्यन्वयः । वित्तमोहे
नमूढत्वादेवतंप्रतिनभातीत्यर्थः । वित्तमूढत्वंव्यनक्ति । अयंलोकइति । अयंलोकोभूलोकः(अस्ति)परोलोकःआमुष्मिकस्तु
नास्ति । ऐश्वर्यंस्थिरमितिमानीअभिमानीतियावत् । पुनःपुनःमेयमस्यममवशमापद्यते। वित्तमूढोवित्तादिकंनित्यंमन्वानोमृ
त्वामृत्वायमयातनामेवानुभवतीत्यर्थः ॥ ६ ॥ भगवतोभानेहेत्वंतरमाह । श्रवणायेति । यस्सांपरायशब्दितोभगवान्बहुभिः

श्रवणायनलभ्यः । बहूनांश्रवणजन्यज्ञानविषयोनभवति । तर्हिकिंशब्दावेद्यएव नेत्याह । शृण्वंतोपिशब्दात्तंजानंतोपिबहवः यंनविद्युःनजानंति । कात्स्र्न्येनेतिवायथावत्त्वेनेतिवाभिप्रायः । अतोनवित्तमूढंप्रतिभातीत्यन्वयः । कुतोनविद्युरित्यतोयथा वत्तयातत्स्वरूपवक्ताश्रोताचदुर्लभइत्याह । आश्चर्यइति । अस्यसांपरायशब्दितस्यश्रेयस्साधनीभूतभगवतःकुशलोवक्तायथा वत्तत्स्वरूपोपदेष्टाआश्चर्योदुर्लभः । कुशलानुशिष्टःयथावदनुशिक्षितःअस्यवक्तुःलब्धा प्राप्ता यथावत्ब्रह्मस्वरूपवक्तृभूताचार्य प्राप्तिमान्ज्ञाताश्रोताचआश्चर्योदुर्लभइत्यर्थः ॥ ७ ॥ निरीश्वरवादिनांतदज्ञानेपिसेश्वरास्तुजानंत्येवेत्यतःकथंवक्तृश्रोत्रोर्दुर्ल

ननरेणावरःप्रोक्तएषसुज्ञेयोबहुधाचिंत्यमानः ।
अनन्यप्रोक्तेगतिरत्रनास्तिअणीयान्ह्यतर्क्यमणुप्रमाणात् ॥ ८ ॥

भत्वमित्यतःसम्यग्ज्ञानिनस्तेनभवंतीत्याह । ननरेणेति । नरेणाज्ञानिमनुष्येणप्रोक्तोवरोप्रकृष्टः । कुतः । बहुधाप्र कृत्युपसर्जनत्वाल्पगुणत्वप्राकृतदेहत्वादिनानाप्रकारेणचिंत्यमानस्सन्तैरेषःसुसम्यक्यथावत्तयाज्ञेयोनभवतीति । अद्वैतिना प्रोक्तेभगवज्ज्ञानमेवनजायतइत्याह । अनन्येति । अहंब्रह्मणोनन्यइतिजानन्स्वात्मब्रह्मणोर्भेदमजानन्ऐक्यमेवजानन् अनन्यउच्यते । तेनप्रोक्तेअत्रब्रह्मविषयेगतिर्ज्ञानंनास्ति । यत्किंचिन्निर्विकल्पक(वस्तु)ज्ञानमेवनभवतीतिभावः । व्या ख्यातृवचनेनब्रह्मज्ञानाभावेपिप्रत्यक्षानुमानाभ्यांस्यात्तज्ज्ञानमित्यतआह । अणीयानिति । अणुप्रमाणात्अणुपरिमाण

तोऽणीयान्अतिसूक्ष्मंहियतोअतोनप्रत्यक्षं । अतर्क्यंच । अनुमानागोचरश्च । केवलानुमानस्यप्रतिपक्षादिग्रस्तत्वादिति भावः ॥ ८ ॥ अतर्क्यमित्युक्तंविवृण्वन्ब्रह्मज्ञानोपायमाह । नैषेति । एषाब्रह्मगोचरामतिःतर्केण आअपेतिपदच्छेदः । आनेयाअपनेयाचनभवति । किंत्वन्येनब्रह्मणोन्योहमितिजानताप्रोक्तामतिःतदुपदेशजन्याबुद्धिः । सुज्ञानायसम्यग्ज्ञानायभवति । हेप्रेष्ठप्रियतमेतिसंबोधनं । हेनचिकेतःयांमतिंत्वमापः । आप्लृव्याप्तौलुङ् । प्राप्तवानसि । एषामतिरि

नैषातर्केणमतिरापनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठ ।
यांत्वमापःसत्यधृतिर्बतासित्वादृङ्नोभूयान्नचिकेतःप्रष्टा ॥ ९ ॥
जानाम्यहंशेवधिरित्यनित्यंनह्यध्रुवैःप्राप्यतेहिध्रुवंतत् ।
ततोमयानचिकेतश्चितोग्निरनित्यद्रव्यैःप्राप्तवानस्मिनित्यं ॥ १० ॥

तिपूर्वेणान्वयः। त्वंसत्यधृतिःअचाल्यधैर्यवानसि । बतेत्याश्चर्ये । नानाप्रकारेणप्रलोभितोपिब्रह्मस्वरूपमतिविषयेधैर्यनमुक्तवानसिइत्येतदाश्चर्यमितिभावः । नः अस्मान्प्रष्टापृच्छकःत्वादृक्नोभूयात्नभवेन्नस्यादेवेति ॥ ९ ॥ त्वयापृष्टंब्रह्मस्वरूपमहंजानामीत्याहयमः । जानामीति । अनित्यं । अःइतिब्रह्मेतिश्रुतेः । अकारस्सर्ववागात्मापरब्रह्माभिधायकइतिस्मृतेश्च अकारोब्रह्मवाची । अकारवाच्यंचतत्नित्यंचेतिअनित्यं । अकारवाच्यंब्रह्मनित्यं । शेवधिःनिधिरितिजानाम्यहं । अनित्यमित्यत्रअइति

भिन्नंपदंवानपुंसकंअकारनामकंब्रह्मनित्यंशेवधिःनिधिसदृशं । परमपुरुषार्थहेतुरितिजानाम्यहं । ध्रुवंशाश्वतंब्रह्म । अध्रुवैः
॥ ११ ॥ नविद्यतेध्रुवंब्रह्मएषांतैःअध्रुवैःब्रह्मज्ञानभक्त्यादिहीनैः । नप्राप्यतेहियस्मात्तस्मात्कारणात्मयाअनित्यद्रव्यैःअःब्रह्मनित्यं
सदायेषांविषयतयास्तीतिवा । अकारवाच्यंब्रह्मरूपंनित्यंवस्तुविषयतयायेषामस्तीतिवा तानि । अनित्यानि । अनित्यानिचता
निद्रव्याणिचमनःप्रभृतीनितैः । अग्निःइष्टकचितिस्थोऽग्निः। चितःतेनचनित्यंशाश्वतंब्रह्मआप्तवानस्मि। हेनचिकेतइति॥१०॥
नकेवलमहमेवजानामिमत्प्रसादात्त्वमपिजानासीतिभावेनप्रागुक्तमनुवदति । कामस्येति । हेनचिकेतःधीरस्त्वंधृत्याधैर्येणमनो

कामस्याप्तिंजगतःप्रतिष्ठांक्रतोरानंत्यमभयस्यपारं ।
स्तोममहदुरुगायंप्रतिष्ठांदृष्ट्वाधृत्याधीरोनचिकेतोत्यस्राक्षीः ॥ ११ ॥

दार्ढ्येनकामस्याप्तिंवित्तादेःप्राप्तिंअत्यस्राक्षीः । अत्यंतंत्यक्तवानभूः । कथंजगतःप्रतिष्ठांप्रतिष्ठापकं । क्रतोःभगवदीयकर्मणः
भगवदीयज्ञानस्यवाआनंत्यंआनंत्यहेतुंअक्षय्यफलदं । अभयस्यपारंतीरंअभयदंस्तोममहत्स्तोमाःस्तोत्रसाधनभूतामंत्राःतेभ्यो
महत्महांतंस्तोमैःसाकल्येनप्रतिपादयितुंअशक्यमितियावत् । उरुभिःब्रह्मादिभिःमुमुक्षिभिर्वागीयतइतिउरुगायं । प्रतिष्ठांमु
क्ताश्रयंदृष्ट्वाज्ञात्वेति । उक्तगुणविशिष्टंविष्णुंज्ञात्वाक्षुद्रकामावाप्तिंनयाचितवानितिभावः । अनंतलोकाप्तिमथोप्रतिष्ठामितिप्रा ॥ ११ ॥
गुक्त(द्वयस्य)जगतःप्रतिष्ठांक्रतोरानंत्यमितिविशेषणद्वयेनानुवादः । स्वर्गलोकाःअमृतत्वंभजंतइत्यस्यअभयस्यपारमित्यनेनानु

वादः । ब्रह्मजज्ञंदेवमीड्यमित्यादिनोक्तंस्तोममहदुरुगायमित्यनेनानूदितमितिज्ञेयं ॥ ११ ॥ नकेवलंत्वमेवत्वदन्योपितंदृष्ट्वातृप्तो
भवतीत्याह । तमिति । दुर्दर्शंअतिप्रयत्नेनज्ञेयं । गूढंअनभिव्यक्तं । अनुप्रविष्टंप्रेरकतयासर्वंजगदंतःप्रविष्टं । गुहाहितंसर्वप्राणिहृ
दयगुहायांहितंसंस्थितं । गह्वरेष्ठंमुक्तजीवेस्थितं । संसार्यगम्यत्वान्मुक्तोगह्वरोज्ञेयः । पुराणंपुरातनं । अध्यात्मयोगेनध्यानयोगेन
जातोधिगमःतेन देवंक्रीडादिगुणविशिष्टं । मत्वाज्ञात्वाधीरोहर्षशोकौजहाति । यस्तुउक्तगुणविशिष्टंभगवंतंध्यानोपायेनज्ञात्वा

तंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं ।
अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहाति ॥ १२ ॥
एतच्छ्रुत्वासंपरिगृह्यमर्त्यःप्रवृह्यधर्मंमणुमेनमाप्य ।
समोदतेमोदनीयंहिलब्ध्वाविवृतंसद्मनचिकेतसंमन्ये ॥ १३ ॥

आस्तेसधीरःकामप्राप्त्यप्राप्तिभ्यांहर्षशोकयुक्तोनभवति । भगवज्ज्ञानेनतृप्तस्सन्परमानंदभरितएवास्तइतिभावः ॥ १२ ॥ एत
ज्ज्ञानंकेनभवतीत्यतोमहतामुपदेशेनेत्याह। एतदिति । योमर्त्यःएतद्ब्रह्ममहद्भ्यःश्रुत्वाधर्मंजगद्धारकंअणुंसूक्ष्मंभगवंतंप्रवृह्यजीवा
त्पृथक्कृत्यसंपरिगृह्यसम्यक्ज्ञात्वाजीवात्भेदेनमुक्तजीवेस्थितंज्ञात्वाऽऽस्तेसएनंभगवंतंआप्यमोदते। हियतोमोदनीयंलब्ध्वाऽऽ
स्तेअतइतियोजना। यद्वामोदनीयंएनंप्राप्यमोदतेहियतःअतःलब्ध्वाएनमित्यनुषंगः । एनंभगवंतंलब्ध्वाज्ञात्वास्थितंनचिकेत

संप्रति। सद्मवैकुंठद्वारंविवृतंप्रकटितंमन्येजानामि। ब्रह्मज्ञानिनात्वयासर्वकामत्यागेनविशेषतोब्रह्मज्ञानस्यार्थ्यमानत्वात्प्रशस्त स्त्वमितिभावः॥१३॥अलंमत्प्रशंसयातत्वंब्रूहीत्याहनचिकेताः। अन्यत्रेति। धर्मादन्यत्रअधर्मादन्यत्रधर्माधर्महीनमितियावत्। अस्मात्प्रमितात्कृताकृतात्। द्वंद्वैकवद्भावः। कार्यात्कारणाच्चान्यत्रअन्यत्तदुभयविलक्षणमितियावत्। भूताच्चातीतात्भ व्याच्चागामिनश्चअन्यत्रतदुभयविलक्षणमितियावत्। कृताकृतादित्यस्यविवरणंवाभूताच्चेत्यादि। तत्लोकविलक्षणतयाप्रसि

अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्।
अन्यत्रभूताच्चभव्याच्चयत्तत्पश्यसितद्वद ॥ १४ ॥
सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति।
यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीमि। ओमित्येतत् ॥ १५ ॥

द्धंयत्यद्वस्तुपश्यसिजानासितद्वदमह्यमित्यर्थः ॥ १४ ॥ पृष्टंब्रह्मस्वरूपंवक्तुंतन्महिमोक्तिपूर्वकंप्रतिजानीते। सर्वइति। आम नंतिमुख्यवृत्त्याबोधयंति। यत्पदंयस्यस्वरूपंयत्प्रतियदुद्दिश्ययत्प्रीत्यर्थंसर्वाणितपांसिकर्माणिवेदाःवदंति। यदिच्छंतोयत्प्रीति मिच्छंतोमहांतःब्रह्मचर्यंब्रह्मगोचरश्रवणादिकंऊर्ध्वरेतस्त्वादिव्रतंवाचरंतिअनुतिष्ठंति। तत्पदंतेतुभ्यंसंग्रहेणसंक्षेपेणब्रवीमीति। ॥ १२ ॥ एवमुक्तोनचिकेताआह ॥ ॐमित्येतदिति। एततत्वयाब्रवीमीतिप्रतिज्ञातंब्रह्मस्वरूपंइतिसर्वेवेदाइतित्वदुक्तप्रकारेणॐभवत्ये

वेत्यंगीकारार्थॐकारः । यद्वातत्पदमित्युक्तंपदंकिमित्यतउक्तं । ॐमिति । एतत्पदंॐमित्युच्यतइत्यर्थः ॥ १५ ॥ ब्रह्मस्वरूपं विवक्षुःतज्ज्ञानिनःफलंमहिमोक्तिपूर्वकमाह । एतद्ध्येवेति । एतत्त्वयापृष्टमक्षरंअविनाशि ब्रह्मैव । एतदेवपरंअक्षरंपरमाक्षरनामकं । हिशब्दौउभयत्रप्रसिद्धिद्योतकौ । योधिकारीज्ञात्वायदिष्टंइच्छतिकामयते तस्यतदिष्टंभवत्येवेत्यर्थः ॥ १६ ॥ एतत्त्वयापृष्टंश्रेष्ठमालंबनंसर्वेषांमुख्याश्रयं परमालंबनंविलक्षणाश्रयं । एतदालंबनंज्ञात्वाब्रह्मलोकेमहीयतेभगवल्लोकेपूज्य

> एतद्ध्येवाक्षरंब्रह्मएतद्ध्येवाक्षरंपरं । एतद्ध्येवाक्षरंज्ञात्वायोयदिच्छतितस्यतत् ॥ १६ ॥
> एतदालंबनंश्रेष्ठमेतदालंबनंपरं । एतदालंबनंज्ञात्वाब्रह्मलोकेमहीयते ॥ १७ ॥
> नजायतेम्रियतेवाविपश्चिन्नायंकुतश्चिन्नबभूवकश्चित् ।
> अजोनित्यश्शाश्वतोयंपुराणोनहन्यतेहन्यमानेपिदेहे ॥ १८ ॥

तइति ॥ १७ ॥ ब्रह्मलोकस्थःपुनःकथंभूतइत्यतोजन्मादिहीनश्चेत्याह । नजायतइति । नेत्यग्रेप्यन्वेति । विपश्चित्ज्ञानीदेहयोगवियोगलक्षणजनिमृतियुक्तोनभवति । कुतइत्यतोहेतुद्वयमाह । नायमिति। नबभूवेतिच । अयंभगवान्कुतश्चिदपिनजायतेनम्रियतइत्यनुकर्षः। भगवतोजन्ममृतिहीनत्वात्तादृशभगवद्विपश्चितोपिदेहयोगवियोगरूपजन्ममृतीनस्तइति। स्वरूपतोजन्माद्यभावाच्चनोक्तरूपजन्ममृतीज्ञानिनइतिभावेनहेतोरसिद्धिनिरासायतत्साधयितुंस्वरूपेणजननंबंधवेलायामपिनास्तिकि

मुतमुक्तावित्याह । नबभूवकश्चिदित्यादि । अयंजीवःपुराणःपुरंदेहमणतिगच्छतीतिपुराणः । देहबंधयुक्तःसन्नपिअजोनित्यः
स्वरूपेणजन्ममृतिहीनः । शाश्वतश्चअविकारश्च । किमुमुक्तौकश्चिदपिनबभूवस्वरूपेणनजायतइति । ननश्यतीत्युपलक्ष्यते ।
जीवस्यकदापिस्वरूपेणजन्ममृत्योरभावात् । देहयोगादिनैवजन्मादेर्वाच्यत्वात्सर्वथादेहबंधान्मुक्तिदशायांकथंदेहयोगादिरू
पजन्ममृतीविपश्चितःस्यातांइतिनबभूवकश्चिदित्यनेनोक्तस्यस्वरूपतोजन्माद्यभावस्यनजायतेनम्रियतइत्युक्तार्थेहेतुत्वंबोध्यं ।

हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं । उभौतौनविजानीतोनायंहंतिनहन्यते ॥ १९ ॥
अणोरणीयान्महतोमहीयानात्मास्यजंतोर्निहितोगुहायां ।
तमक्रतुःपश्यतिवीतशोकोधातुःप्रसादान्महिमानमात्मनः ॥ २० ॥

यद्वानबभूवकश्चिदित्यनेनैवकदापिस्वरूपेणनबभूवननश्यतीतिनजायतइत्यादौउक्तेर्थेस्वरूपाजननादिहेतुमुक्त्वोपसंहरतिस्व
रूपस्यानादिनित्यत्वमजोनित्यइत्यादिना । प्राग्वदेवार्थः । ननुपुराणत्वेदेहहानिरस्तिकिमित्यतोनेत्याह । नहन्यतइति ।
॥ १८ ॥ नन्वेवंहंताहतश्चाहमितिप्रतीतिःकथमित्यतोभ्रांतिरित्याह । हंतेति । जीवस्वभावंहंतुमितियोज्यं । नविजानीतइति ।
जीवस्वरूपस्यनित्यत्वादितिभावः ॥१९॥ एवमुपदिश्यमानब्रह्मज्ञानिनःफलमुक्त्वाप्रेतजीवनियंतृब्रह्मोपदिशति । अणोरणी ॥ १३ ॥
यानिति । अस्यनबभूवेत्यादिनोक्तदिशाअनादिनित्यस्यजंतोर्जीवस्यगुहायांहृदिप्रेरकतयानिहितोनितरांस्थितइति । एतदालं

बनंज्ञात्वेत्युक्तैतज्ज्ञानस्य(क्रम)प्रथमभाविसाधनमाह । तमिति । तंअणीयस्त्वाद्युक्तगुणयुक्तंआत्मनःस्वस्मात्महिमानंमहांतं
महागुणपरिमाणंअक्रतुःअकारवाच्यविष्णुविषयकक्रतुशब्दितनिश्चयवान्धातुःहरेःप्रसादात्पश्यतिध्यानद्वारासाक्षात्करोति।
ततश्चवीतशोकोभवति ॥२०॥ पुनश्चभगवतोमहिमानमेवाह । आसीनइति । सामर्थ्यातिशयादेवासीनइत्यादिविरुद्धधर्मवत्त्वं
तस्यज्ञेयं । मदामदं । मदश्चामदश्चसुखमसुखंततोभवतीतिमदामदंसुखासुखहेतुं । तंदेवंमदन्यःकःज्ञातुमर्हति ॥ २१ ॥ पुन

आसीनोदूरंव्रजतिशयानोयातिसर्वतः । कस्तंमदामदंदेवंमदन्योज्ञातुमर्हति ॥ २१ ॥
अशरीरंशरीरेषुअनवस्थेष्ववस्थितं । महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ २२ ॥
नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन ।
यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूंस्वां ॥ २३ ॥

स्तन्महिमोक्तिपूर्वकंतज्ज्ञानिनःफलमाह । अशरीरमिति । अनवस्थेषुनश्वरेषुशरीरेषुप्राणिदेहेषुअशरीरंतत्शरीरनिमित्तकवि
काररहिततयावस्थितं । महांतंदेशकालगुणतोमहांतं विभुंसमर्थमात्मानंस्वामिनं मत्वाधीरोनशोचतिमुक्तोभवति ॥ २२ ॥
ननुश्रवणाद्युपायेनापितज्ज्ञानसंभवात्धातुःप्रसादात्तंपश्यतीत्यनुपपन्नमित्यतआह । नायमिति । प्रवचनेनव्याख्यानेनल
भ्योदर्शनीयोनभवति । नमेधया स्वकीयप्रज्ञाबलेननलभ्यः । बहुनाश्रुतेनश्रवणेननलभ्यः । किंतुयंएषःभगवान्वृणुतेस्वीकरो

ति। यस्मैप्रसीदतीतियावत्। तेनैवलभ्योदर्शनीयः। कथं। तस्यप्रसादविषयस्यएषआत्मास्वांतनुंविवृणुतेप्रदर्शयतीति। कथमन्यथाअव्यक्तैकस्वरूपस्यतत्प्रसादेनविनाअपरोक्षतेतिभावः। तथाचसूत्रं। अतोनंतेनतथाहिलिंगमिति॥२३॥ तद्दृष्टेःप्रसादैकलभ्यत्वेकिंवैराग्यादिसाधनैरित्यतःज्ञानद्वराप्रसादहेतुतयातदप्यावश्यकमितिभावेनाह। नाविरतइति। दुश्चरितात्दुराचारात्अविरतःअनिवृत्तःदुराचारीतियावत्। प्रज्ञानेनप्रज्ञानद्वाराएनंभगवंतंतत्प्रसादंनाप्नुयादित्यन्वयः। एवमग्रेपि। अशांतःश्रवणमनन

नाविरतोदुश्चरितान्नाशांतोनासमाहितः। नाशांतमानसोवापिप्रज्ञानेनैनमाप्नुयात्॥ २४॥
यस्यब्रह्मचक्षत्रंचोभेभवतओदनः। मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसः॥ २५॥
इतिकाठकेप्रथमेद्वितीयावल्ली॥ १। २॥

ध्यानैर्भगवन्निष्ठारहितःअसमाहितःयथावस्तुतथाज्ञानहीनः। अशांतमानसःविषयभोगेअलंबुद्धिहीनःविषयलंपटइतियावत्॥२४॥ पुनस्तन्महिमोक्तिपूर्वकंतज्ज्ञानंदुर्लभमित्याह। यस्येति। यस्यभगवतःब्रह्मब्राह्मणत्वजात्याक्रांतंवस्तुक्षत्रंक्षत्रियत्वजात्याक्रांतंच इतरेतरसमुच्चयेचशब्दौ उभेब्रह्मक्षत्रेओदनःअन्नंभवतःयस्यब्रह्मक्षत्राख्यओदनवतःमृत्युःप्राणिनांमारकःउपसेचनंअद्यमानत्वेसत्यन्नादनसाधनंव्यंजनरूपमित्यर्थः। सएवंजगत्संहर्तृत्वगुणकोमहाबलःयत्रतिष्ठतिइत्थाइत्थंएवंप्रकारेणतदितिशे

षः। तस्यावस्थानंकोवेदनकोपीति॥२५॥ इतिकाठकार्थसंग्रहेप्रथमाध्यायेद्वितीयावल्ली ॥१।२॥ अध्यात्मयोगाधिगमेनेतिभगवतो ध्यानमुक्तं। सकृत्रध्येयइत्यतोधिष्ठानमाह। ऋतमिति। यौसुकृतस्यलोकेपुण्यसंबंधिनिलोकेपुण्यनिर्मितशरीरेहृदयगुहायांप्रविष्टौतत्रापिपरमेसर्वजीवोत्तमेपरार्धेपरमत्यंतंपरेभ्यइतिवाआसमंतात्ऋद्धेअभिवृद्धेज्ञानादिपूर्णेमुख्यवायौप्रविष्टौऋतंसुकृतफलंपिबंतौभुंजानौआत्मांतरात्माख्यविष्णुरूपविशेषौब्रह्मविदःब्रह्मज्ञानिनःपंचाग्नयःदेवयज्ञपितृयज्ञभूतयज्ञमनुष्ययज्ञब्रह्मयज्ञ

ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे।
छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिनाचिकेताः॥ १ ॥
यःसेतुरीजानानामक्षरंब्रह्मतत्परं। अभयंतितीर्षतांपारंनाचिकेतंशकेमसि ॥ २ ॥

रूपपंचमहायज्ञवंतः। द्युपर्जन्यपृथिवीपुंस्त्रीरूपपंचाग्निविद्यानिष्ठावात्रिनाचिकेताःत्रिवारकृतनाचिकेताग्नयःयेतेछायातपौसाध्वसाध्वोःछायातपाविवसुखदुःखदौवदंतीति। तथाचसूत्रं। गुहांप्रविष्टावात्मानौहितद्दर्शनादिति। हृदयगुहास्थवायौध्येयइतिभावः ॥ १ ॥ ध्यानस्याभ्यर्हितंप्रत्याहाररूपंसाधनंविज्ञानसारथिरित्यादिनाविवक्षुःभगवंतंस्तुवन्प्रतिजानीते। यःसेतुरिति। ईजानानांयजतेःकानच्संप्रसारणं। विष्णुयाजिनांयःसेतुःमर्यादायदक्षरंब्रह्मपरंउत्तमंतितीर्षतांसंसारार्णवंतर्तुमिच्छतांअभयंपारंअभयप्रदंतीरं। ध्यातुंनाचिकेतंनचिकेतसंप्रतिसाधनंवक्तुंशकेमसिशक्नुमइतियोज्यं। शक्लृशक्तौशब्विकरणंछांदसं।

इदंतोमसीतिमसिः ॥ २ ॥ उपोद्धातंश्लोकद्वयेनाह । आत्मानमिति । आत्मानंशरीरांतर्व्यापिनंजीवमेवरथिनंविद्धि । शरी
रंचरथंविद्धिजानीहि । प्रग्रहंरज्जुंमनस्त्वित्यन्वयः ॥ ३ ॥ इंद्रियाणिश्रोत्रादीनिहयानश्वानाहुःप्राज्ञाःतेषुतेषांव्यत्ययात् । ह
यरूपेंद्रियाणांगोचरान्विषयभूतान्शब्दादीन्विषयान्अश्वसंचारानुकूलदेशानाहुःइत्यर्थः । आत्माआत्मानंइंद्रियमनोभिर्यु

आत्मानंरथिनंविद्धिशरीरंरथमेवच । बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच ॥ ३ ॥
इंद्रियाणिहयानाहुर्विषयांस्तेषुगोचरान् । आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः ॥ ४ ॥
यस्त्वविज्ञानवान्भवत्ययुक्तेनमनसासदा । तस्येंद्रियाण्यवश्यानिदुष्टाश्वाइवसारथेः ॥ ५ ॥
यस्तुविज्ञानवान्भवतियुक्तेनमनसासदा । तस्येंद्रियाणिवश्यानिसदश्वाइवसारथेः ॥ ६ ॥
यस्त्वविज्ञानवान्भवत्यमनस्कःसदाशुचिः । नसतत्पदमाप्नोतिसंसारंचाधिगच्छति ॥ ७ ॥

क्तंभोक्तेतिसुखदुःखानुभवकृतोच्चत्वनीचत्वभाजमाहुःमनीषिणोज्ञानिनइत्यर्थः ॥ ४ ॥ अश्वभूतेंद्रियाणांप्रत्याहारःकस्य
भवतिकस्यनेत्यतोरथित्वाद्युक्तेरुपयोगोक्तिपूर्वमाह । यस्त्विति । यस्सदाऽयुक्तेनअनिगृहीतेनमनसाअविज्ञानवान्विवेकही
नोभवतितस्येत्यादिव्यक्तं ॥ ५ ॥ युक्तेननिगृहीतेनविज्ञानवान्सारथिस्थानीयबुद्धिमान्सारासारविवेकवान् । तस्येत्यादिव्य ॥ १५ ॥
क्तं ॥ ६ ॥ वशीकृतेंद्रियत्वरूपप्रत्याहाराभावभावायोःकोविशेषःयेनसआवश्यकइत्यतःतदभावेतद्भावेचविशेषमाह । यस्त्वित्या

दिनामंत्रद्वयेन । अविज्ञानवान्विवेकाख्यबुद्धिरूपसारथिहीनोभवति । अमनस्कःअवशीकृतमनस्कः । अशुचिरिति । विषयलं
पटत्वादितिभावः । इष्टाप्राप्त्यनिष्टप्राप्तीचआह । नसइति । तत्पदंसर्वेवेदाइत्युक्तंब्रह्मस्वरूपं ॥७॥ विज्ञानवान्बुद्धिरूपसारथि
युक्तःसमनस्कःवशीकृतमनस्कः । शुचिरिति । विषयालंपटत्वादितिभावः । भूयःपुनरित्यर्थः ॥ ८ ॥ एवंप्रत्याहाराभावभावयोः
अनर्थप्राप्तीष्टप्राप्तीनिरूप्यप्रत्याहाररूपंसाधनंफलोक्त्यानिर्धारयति । विज्ञानेति । वशीकृतेंद्रियवानित्यपिज्ञेयं । सारथिप्र

यस्तुविज्ञानवान्भवतिसमनस्कःसदाशुचिः । सतुतत्पदमाप्नोतियस्माद्भूयोनजायते ॥ ८ ॥
विज्ञानसारथिर्यस्तुमनःप्रग्रहवान्नरः । सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदं ॥ ९ ॥
इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः । मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः ॥ १० ॥

ग्रहवत्त्वोक्त्यैववशीकृतेंद्रियत्वंलब्धमितितदनुक्तिः । अध्वनःसंसारपदव्याःपारंतीरभूतंतद्विष्णोःपरमंपदंस्वरूपमाप्नोतीति
॥ ९ ॥ भगवद्ध्यानंचतारतम्यांतगत्वेनकार्यमितिभावेनदेवतातारतम्यमाह । इंद्रियेभ्यइति । इंद्रियेभ्यःश्रोत्रत्वक्चक्षूरसन
घ्राणवाक्पाणिपादपायूपस्थेभ्यःज्ञानेंद्रियकर्मेंद्रियनियंतृतयातत्तन्नामभ्यःक्रमात्तत्तदभिमानिदेवेभ्यःसोमकुबेरसूर्यवरुणा
श्व्यग्नींद्रजयंतयमदक्षेभ्यःअर्थाःशब्दस्पर्शरूपरसगंधरूपाःश्रोत्रादिविषयाःतदभिमानिन्यःसौपर्णीवारुणीपार्वतीतिस्रोदेव्यः
पराउत्तमाइत्यर्थः । अभिमानिनयन्यायेनइंद्रियादिशब्दानांअभिमानिषुमुख्यत्वात् । शब्दादीनांपंचत्वेपिसौपर्णीवारु

ण्यौद्वयोर्द्वयोर्देवतेपार्वतीत्वेकस्येतिविवेकः। अर्थेभ्यःअर्थाभिमानिनीभ्यःतिसृभ्योदेवीभ्यःमनःमनोभिमानिनोरुद्रवींद्रशेषाः
पराः । तेभ्यःबुद्धिःबुद्धितत्वाभिमानिनीसरस्वतीपरा । तस्याःमहान्महत्तत्वाभिमानीआत्माविरिंचःपरः ॥ १० ॥
महतःचतुर्मुखात्अव्यक्तंप्रकृत्यभिमानिनीश्रीःपरा । अव्यक्तात्श्रीतत्वात्पुरुषःपूर्णत्वहेतुनापुरुषनामाविष्णुःपरः। पुरुषा
त्परंकिंचिन्नास्तिसापुरुषःकाष्ठाअवधिःदेवतातारतम्यविश्रांतिभूमिः । सेतिविधेयापेक्षयास्त्रीलिंगोक्तिः । परागतिःपरम

महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः। पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः ॥ ११ ॥
एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते। दृश्यतेत्वग्र्यया‌बुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः ॥ १२ ॥
यच्छेद्वाङ्मनसिप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि। ज्ञानमात्मनिमहतितदिच्छेच्छांतआत्मनि ॥ १३ ॥

प्राप्यः॥११॥ एवंविधःकश्चिदस्तिचेत्कुतोनोपलभ्यतइत्यतआह । एषइति। गूढोत्माअंतर्हितस्वरूपःसन्नप्रकाशते । तर्हिकिं
दर्शनार्थंप्रयत्नेनेत्यतउक्तं । दृश्यतइति । तुर्भगवत्प्रसादरूपहेतुद्योतकः । अग्र्ययाश्रवणादिजनितयाभगवत्प्रसादसध्री
चीनयासूक्ष्मयाबुद्ध्यासूक्ष्मदर्शिभिर्दृश्यतइत्यर्थः ॥ १२ ॥ पूर्वत्रभगवतस्सर्वोत्तमत्वेनपूर्वपूर्वस्मादुत्तरोत्तरेषांउत्तमत्वेनचध्या
नंकार्यमितिभावेनतारतम्यमुक्तं । नकेवलंतावदेवकिंतुपूर्वपूर्वेषांउत्तरोत्तरनियतत्वंचध्येयमितिभावेनाह । यच्छेदिति । ॥ १६ ॥
प्राज्ञःज्ञानीइंद्रियाभिमानिनःप्रागुक्तान्सोमादीन्वाचिवागभिमानिनीषुपार्वतीवारुणीसौपर्णीषुयच्छेदितिआदौयोज्यं। नियम

नंनामतदधीनत्वचिंतनं । तन्नियतान्चिंतयेदित्यर्थः । एवमग्रेपि । वाङ्मनसीत्यत्रवाचंवागभिमानिनीःउमाद्यास्तिस्रोदेवीः
मनसिमनोभिमानिषुशिवशेषसुपर्णेषुयच्छेत्तन्नियतत्वेनध्यायेत्। तत्मनोमनोभिमानिनःशिवशेषसुपर्णान्त्रीन्ज्ञानेआत्मनि
ज्ञानाभिमानिन्योःसरस्वतीभारत्योःयच्छेत् । ज्ञानंज्ञानाभिमानिन्यौसरस्वतीभारत्यौमहतिमहत्तत्वाभिमानिनोःआत्मनिआ
त्मशब्दोदितयोःविरिंचवाय्वोःयच्छेत् । तत्महत्तत्वाभिमानिद्वयंशांतेसुखरूपेआत्मनिपरमात्मनियच्छेत्। प्राज्ञइतिसर्वत्रानु
षंगः । अत्रतद्यच्छेदव्यक्तेतच्चशांतआत्मनीतिवक्तव्येपिअव्यक्ततत्वाभिमानिनःश्रीतत्वस्यस्वभर्तृनियतत्वंचसिद्धमेवेतिनोक्तं ।
अध्याहारोवाबोध्यः । तथाहिभाष्यं । तौरमायांपरानंदेताविष्णौपरमात्मनीति ॥ १३ ॥ एवंयमनचिकेतसोःसंवादमियता

उत्तिष्ठतजाग्रतप्राप्यवरान्निबोधत । क्षुरस्यधारानिशितादुरत्ययादुर्गंपथःतत्कवयोवदंति ॥ १४ ॥

ग्रंथेनानूद्यवेदपुरुषःस्वयंसाधूनांहितमुपदिशति। उत्तिष्ठतेति।हेसाधवःउत्तिष्ठतनानाविधविषयचिंतनान्निवृत्ताभवत। जाग्रत
जागृतआलस्यंमुंचत । प्राप्यवरान् महद्भ्योवरान्प्राप्य। परानितिपाठेमहतःप्राप्य भगवंतंनिबोधत। नितरांबुध्यध्वं। शब्विक
रणंपरस्मैपदंछांदसं । कुतोयंभगवद्बोधःसंपाद्यःबंधनिवृत्तेःभगवद्बोधादन्येनापिसंभवादित्यतआह । क्षुरस्येति । संसृतिरि
तिशेषः । संसृतिःक्षुरस्यकेशनिकृंतनसाधनस्यधाराधारेवनिशिताऽतितीक्ष्णाबहुशःदुःखकारिणीदुरत्ययादुःखेनअत्येतव्यात
र्तव्याभगवद्बोधादन्येनअत्येतुमशक्येतियावत् । अस्त्वेवंसंसृतिर्भगवद्बोधनिवर्त्या भगवज्ज्ञानार्थंउत्थानादिकंकुतः । तत्सुल

भोपायांतरेणापिस्यादित्यतआह। दुर्गमिति। तत्संसृतिनिवर्तकंब्रह्म पथःश्रवणमननध्यानरूपाद्वैराग्यभक्त्याद्यंगसहितान्मार्गात्दुर्गंअतिक्लेशेनज्ञेयं। तथाअर्चिरादिरूपादत्यायाससंपाद्यान्मार्गात्दुर्गंअतियत्नेनगम्यंप्राप्यंचेतिकवयोज्ञानिनोवदंति। नचतस्यज्ञानप्राप्तीसुलभोपायसाध्ये। नचतज्ज्ञानप्राप्तीविनानिश्शेषबंधनिवृत्तिर्भवति। अतउत्तिष्ठतजाग्रतेत्याद्युक्तिर्युक्तेति ॥ १४ ॥ कुतोब्रह्मणोदुर्गमत्वमित्यतःतस्यश्रोत्राद्यविषयत्वादित्याह। अशब्दमिति। तद्ब्रह्मअशब्दंशब्दगुणहीनं। इत्थमितिशब्दावेद्यंचअत्याश्चर्यवस्तुत्वात्अस्पर्शंस्पर्शगुणहीनं। अतएवत्वग्विषयत्वहीनं। अरूपंअतएवचक्षुर्गोचरत्वहीनं। भौतिकरूपराहित्यादेवाव्ययंनाशहीनं। रूपादिमत्त्वाच्चविपर्ययोदर्शनादितिसूत्रेभौतिकरूपादिमतएवानित्यत्वोक्तेः। तथाऽरसंरसगुणवर्जितंचअतएवरसनेंद्रियाविषयः। अगंधवत्। नित्यंगंधवन्न। अतएवघ्राणाविषयश्च। बंधनिवर्तकंतज्ज्ञानंकेनमार्गेणभवतीत्यतोदुर्गपथइत्युक्तमाह। अनादीति। अनाद्यनंतंआद्यंतवर्जितंमहतोमहत्तत्वाभिमानिचतुर्मुखात्परं। ध्रुवं शश्वदेकप्रकारं तंतारतम्यांतगत्वेनप्रागुक्तंपुरुषं निचाय्यविचार्य श्रवणादिभिर्निश्चित्यतदपरोक्षजप्रसादद्वारामृत्युमुखात्संसृतिबंधात्प्रकर्षेणमुच्यते। शब्दाद्यवेद्योपिभगवान्सदाचार्यसहायलब्धश्रवणमननध्यानावृत्त्याप्रसन्नःस्वापरोक्षंदत्वाबंधान्मोचयतीतिभावः।

अशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयत्।
अनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यते ॥ १५ ॥

तदाहसूत्रकारः। प्रकाशश्चकर्मण्यभ्यासादिति। अत्रमहतःपरादव्यक्तात्परमितिवक्तव्येप्यव्यक्ताभिमानिन्याःस्वभार्यायाःश्रियःपरत्वंसिद्धमितिमहतःपरमित्येवोक्तं। तेनमहत्परत्वलिंगादव्यक्तमेवात्रनिचाय्यवाक्येनकथ्यतइतिप्रत्युक्तं। तदाहसूत्रे। वदतीतिचेन्नप्राज्ञोहीति ॥ १५ ॥ एवंवेदपुरुषःयमनचिकेतस्संवादमनूद्यसाधुशिक्षांचकृत्वाएतद्विद्याप्रवचनश्रवणयोःफलोक्तिपूर्वकमुपसंहरति। नाचिकेतमिति। नचिकेतसःसंबंध्युपाख्यानंतच्चरितप्रतिपादकग्रंथसंदर्भे। सलोपःछांदसः। व्यक्तोमंत्रद्वयार्थः। द्विरुक्तिरादरार्था। प्रोक्तसर्वावधारणार्थाच ॥१६॥ इतिश्रीकाठकार्थसंग्रहेप्रथमाध्यायेतृतीयावल्ली ॥ इतिप्रथमोध्यायः॥ १॥छ॥ पुनरपिब्रह्मविद्यांवक्तुंतदंतयावैराग्यंदुःसंपादमपियत्नेनसंपाद्यमितिभावेनाह। परांचीति। स्वयमेवभवतीतिस्वयंभूःस्वतंत्रोभगवान्। तत्पुत्रोब्रह्मावा। खानिइंद्रियाणिपरांचिपराङ्मुखानि। अतएवव्यतृणात्कुत्सितान्यकरोत्। तृणुकात्करणइति

नाचिकेतमुपाख्यानंमृत्युप्रोक्तंसनातनं। उक्त्वाश्रुत्वाचमेधावीब्रह्मलोकेमहीयते ॥
यइदंपरमंगुह्यंश्रावयेद्ब्रह्मसंसदि ॥ प्रयतःश्राद्धकालेवातदानंत्यायकल्पते। तदानंत्यायकल्पतइति॥१६॥
इतितृतीयावल्ली ॥ १। ३ ॥ इतिकाठकोपनिषदिप्रथमोध्यायः ॥ १ ॥
परांचिखानिव्यतृणात्स्वयंभूस्तस्मात्पराक्पश्यतिनांतरात्मन्।
कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥

धातोः । तस्मात्कारणात्पराक्बाह्यान्विषयान्पश्यतिजीवः । आत्मन्आत्मनःस्वस्यअंतःनपश्यतिसदाबहिर्दृष्टिरेवास्तइत्यर्थः । कश्चिद्धीरोज्ञानीअमृतत्वंमुक्तिमिच्छन्आवृत्तचक्षुः । उपलक्षणमेतत् । विषयेभ्यःपरावृत्तचक्षुरादिकरणःसन्प्रत्यगंतःआत्मानंस्वांतस्थंभगवंतंऐक्षत्ईक्षतइत्यर्थः । लडर्थेलङ्परस्मैपदंछांदसं ॥ १ ॥ मुमुक्षुःसर्वथानविषयप्रमादीस्यादितिभावेनाह । पराचइति । येबालाःबालाइवाविवेकिनःपराचःबाह्यान्कामान्स्रक्चंदनवनितादिविषयान्अनुयंति । अनुसृत्यतिष्ठंति । ते

पराचःकामाननुयंतिबालास्तेमृत्योर्यंतिविततस्यपाशं ।
अथधीराअमृतत्वंविदित्वाध्रुवमध्रुवेष्विहनप्रार्थयंते ॥ २ ॥
येनरूपंरसंगंधंशब्दान्स्पर्शांश्चमैथुनान् । एतेनैवविजानातिकिमत्रपरिशिष्यते । एतद्वैतत् ॥ ३ ॥

विततस्यबहुकालीनस्यमृत्योःअविद्याकामकर्मादेःपाशंबंधंतत्कृतक्लेशंयंतिप्राप्नुवंति । अथतस्मादिहलोकेधीराविवेकिनःध्रुवममृतत्वंमोक्षंविदित्वाज्ञात्वाअध्रुवेषुवित्तादिषुविषयेनप्रार्थयंते । तेननचिकेतसःस्तुतिरर्थाद्गम्यते ॥२॥ नचिकेताअर्थात्प्राप्तामात्मनःस्तुतिंमत्वाअलंस्तुत्याक्षिप्रंतत्वंवदेतिभावेनपृच्छतियेनेति । येनएतेनैवब्रह्मणाप्रेरितोरूपादीन्विजानातितदेतत्जीवप्रेरकंब्रह्मात्रमोक्षेपरिशिष्यते । मुक्तजीवप्रेरकत्वेनआस्तेकिमितिप्रश्नार्थः । इतिपृष्टोयमःप्रत्युत्तरमाह । एतद्वैतदिति । तत्त्वया परिशिष्यतेकिमितिपृष्टंएतद्वैएतद्गुणकंसत्परिशिष्यतेवैअसंशयमित्यर्थेवैनिपातः । परिशिष्यतइत्येतदत्राप्यन्वेति ॥ ३ ॥

मुक्तौनियामकंब्रह्मस्वरूपंविस्तरेणब्रूहीतिपृष्टोयमोविस्तरेणाह । स्वप्नांतमिति । हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं । यथा मरणंप्राप्यात्माभवतिगोतमइतिउत्तराध्यायगतंप्रतिज्ञावाक्यंअत्रादौयोज्यमितिवदंतिभाष्येअत्रैवव्याख्यानात् । पूर्वार्धः स्पष्टार्थः । उत्तरार्धस्यतुआत्माजीवःमरणंप्राप्ययथाभवतितच्चप्रवक्ष्यामि । जीवेशभेदज्ञापनायेत्यर्थः । स्वप्नांतंसुषुप्तिंजाग रितांतंस्वप्नंचोभौसुषुप्तिस्वप्नौयेनप्रेरितोजीवःपश्यतितंमहांतमित्यन्वयः ॥ ४ ॥ योधिकारीइदंइमंमध्वदंमधुसुखंअत्तीतिमध्व

स्वप्नांतंजागरितांतंचोभौयेनानुपश्यति । महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ ४ ॥
यइदंमध्वदंवेदात्मानंजीवमंतिकात् । ईशानंभूतभव्यस्यनततोविजुगुप्सते । एतद्वैतत् ॥ ५ ॥
यःपूर्वंतपसोजातमद्भ्यःपूर्वमजायत । गुहांप्रविश्यतिष्ठंतंयोभूतेभिर्व्यपश्यति । एतद्वैतत् ॥ ६ ॥

दःतं । अत्तेरच्प्रत्ययः । देहेस्थित्वासारभोक्तारमितियावत् । जीवमंतिकात्जीवसमीपेतन्नियामकतयास्थितंआत्मानंभूतभ व्यस्य द्वंद्वैकवद्भावः । भूतभाविनोरीशानंप्रेरकंवेदजानाति । स ततःआत्मनोनियामकतयाज्ञातत्वात् । नविजिगुप्सते । गु पूरक्षणे । आत्मानंगोप्तुंरक्षितुंनेच्छति । भगवानेवसदासर्वत्ररक्षकतयास्तइतिज्ञात्वास्वात्मरक्षणार्थंनप्रयततइत्यर्थः । एतद्वैतत् यत्त्वयापृष्टंतत्एतद्वैप्रागुक्तगुणकंवै ॥५॥ पुनर्भगवतोमहिमोक्तिपूर्वकंत्वत्पृष्टमेवंरूपमितिबहुभिर्मंत्रैराह । यइति । योभगवान् अजातंपूर्वमजातंचतुर्मुखंतपसःतपोनामकाच्छिवात्पूर्वंअद्भ्यःअप्नामकेभ्योभूतेभ्यश्चपूर्वमजायत । अजनयत् । अंतर्णीतणिच् ।

योभगवान्गुहांहृदयगुहांप्रविश्यतिष्ठंतंस्वात्मानंभूतेभिःभूतैस्सहव्यपश्यति । विशेषेणपश्यति । अडागमःछांदसः । एतद्वैतत् । यत्त्वयापृष्टंततएतद्वैउक्तगुणकंवै । अजातमितिविशेषणंतुभगवन्मुखाद्यवयवतोजाताएवेंद्रादयःकश्यपात्पुनर्जायंते । नतथाभगवतोब्रह्मा । किंतुपूर्वमजातएवभगवतोजातइतिवक्तुं ॥ ६ ॥ याप्राणेनेति । अदनात्सर्वजगद्भक्षणात्अदितिनाम्नीदेवतामयी सर्वदेवोत्तमा । मयट्प्राधान्यार्थे । याभगवत्तनुःप्राणेनमुख्यवायुनासहसंविशतितिष्ठतियाचभगवत्तनुःगुहांप्रविश्यतिष्ठंतींस्व

याप्राणेनसंविशत्यदितिर्देवतामयी । गुहांप्रविश्यतिष्ठंतींयाभूतेभिर्व्यजायत । एतद्वैतत् ॥ ७ ॥
अरण्योर्निहितोजातवेदागर्भइवसुभृतोगर्भिणीभिः ।
दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ८ ॥

कीयामेवतनुंभूतेभिःभूतैःप्राणिभिस्सहव्यजायत । विविधतयाजनयामास । अंतर्णीतणिच् । मत्स्यादिनानारूपतयास्वात्मानं प्रादुर्भावयामास । प्राणिनश्चदेहयोगेननानाविधानुत्पादयामासेतियावत् । एतद्वैतत् । त्वयापृष्टंयत्ततएतद्वैइति ॥ ७ ॥ अरण्योरिति । ऋगतावित्यतःकर्मण्यकारेगुणेचअरेतिरूपं । अरःज्ञायमानःणःसुखरूपोहरिःयाभ्यांगुरुशिष्याभ्यांतौगुरुशिष्यावरणी । समासांतइकारः । अरण्योःगुरुशिष्ययोःजातवेदाः । जातंसर्ववेत्तीतिजातवेदाः । जातमित्युपलक्षणं । सर्वज्ञोहरिःनिहितः । नितरांस्थितः । कइवगर्भिणीभिःस्त्रीभिःसुभृतःसम्यक्धृतःगर्भइव । अग्निःअरण्योःगुरुशिष्ययोःनिहितःअदनाद

ग्निनामाहरिः । जागृवद्भिःभगवज्ज्ञानवद्भिः । नहिज्ञानादितोन्यज्जागरणमस्ति । यानिशासर्वभूतानांतस्यांजागर्तिसंयमीत्यादेः । हविष्मद्भिःयज्ञसाधनवद्भिःमनुष्येभिःमनुष्यैःदिवेदिवेप्रतिदिनंईड्यःस्तुत्योवर्तते ॥ ८ ॥ पुनश्चमहिमोक्तिपूर्वकंत्वत्पृष्टं एतादृगित्याह । यतश्चोदेतीति । सूर्यःसृष्टिकालेयतोयस्मादुदेति । यत्रचयस्मिंश्चहरौप्रलयकालेअस्तमदर्शनंगच्छति । तंसर्वेदेवाःअर्पिताःतमाश्रित्यस्थिताइत्यर्थः । तत्तंसर्वदेवाश्रयंगुणतःस्वरूपतोवाकश्चनकोपिनउनैवात्येतिनातिक्रामति । एतद्वैतत्त्वयापृष्टमेतद्वैअरण्योरित्यादिनोक्तगुणकंवै ॥ ९ ॥ पूर्वंगुहांप्रविश्यतिष्ठंतीमित्यत्रउक्तमत्स्याद्यवताराणांब्रह्मादि

यतश्चोदेतिसूर्योस्तंयत्रचगच्छति । तंदेवास्सर्वेअर्पितास्तदुनात्येतिकश्चन । एतद्वैतत् ॥ ९ ॥
यदेवेहतदमुत्रयदमुत्रतदन्विह । मृत्योस्समृत्युमाप्नोतियइहनानेवपश्यति ॥ १० ॥

भूतप्रेरकाणांमूलरूपेणगुणकर्मादिनावाभेदोभेदाभेदोवानेतिमहिमांतरमाह । यदेवेति । इहदेहादिषुयदेवाऽवतारजातमस्ति तदेवामुत्रवैकुंठादिलोकेषुमूलरूपतयाआस्तेतयोःकश्चिदपिभेदोनास्ति । इंद्रार्जुनादाविवावांतरविशेषोपिनेतिभावेनाह । यदमुत्रेति । यदमुत्रमूलरूपमस्तितदनुतदेवेहदेहादिषुस्थितमवतारजातं । गुणतःस्वरूपतोवानाणुमात्रंविशेषोस्तीतिभावः । एतच्चोपलक्षणं । इहस्थानामपिरूपाणांनियम्याख्यस्थानभेदेपिनभेदइत्यपिध्येयं । तथाचसूत्रं । नस्थानतोपिपरस्योभयलिंगं सर्वत्रहीति । कुतएतदित्यतस्तथापश्यतोनर्थस्यसद्भावादित्याह । मृत्योरिति । यःइहभगवन्मूलरूपावताररूपेषुनाना भाव

प्रधानंनानात्वंभेदंइवशब्दाद्भेदाभेदंवापश्यतिजानातिसमृत्योःमारकात्मृत्युंमरणंतमोलक्षणंप्राप्नोति ॥ १० ॥ भगवद्रू
याणांभेदादिर्नेत्युक्त्वास्वावयवगुणकर्मभिःभेदादिर्नेत्याह । मनसैवेति । इहमूलरूपेअवताररूपेषुवाकिंचनगुणकर्मादिकं
नानाभिन्नंनास्ति । तदाहउभयव्यपदेशादिति । नयेप्रतिषेधाच्चेतिसूत्रकारः । इदंरूपादिषुभेदादिकंनेत्येतत्प्रमेयं मन
सैवमननसमर्थेनैवअंतःकरणेनैवाप्तव्यंज्ञातव्यं । नतुभेदकार्यव्यवहारादिहेतुबलेनापलपनीयं । कुतएवमित्यतोऽन्यथाप
श्यतोऽनर्थसत्त्वादित्याह । मृत्योरिति । नानेवेतिभिन्नंभिन्नाभिन्नंवाइहगुणकर्मादिषु । अतोनपूर्वेणपौनरुक्त्यंतस्य

मनसैवेदमाप्तव्यंनेहनानास्तिकिंचन । मृत्योस्समृत्युंगच्छतियइहनानेवपश्यति ॥ ११ ॥
अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठति । ईशानोभूतभव्यस्यनततोविजुगुप्सते । एतद्वैतत् ॥ १२ ॥

स्वरूपविषयत्वादस्यचगुणकर्मावयवविषयत्वात् ॥ ११ ॥ गुहांप्रविश्यतिष्ठंतीमित्यत्रोक्तनियामकरूपाणांनियम्यभूतस्था
नभेदप्रसक्तंभेदंनिरस्यइदानींगुहास्थस्योपासनार्थंपरिमाणविशेषमाह । अंगुष्ठमात्रइति । कथमपरिच्छिन्नस्यतन्मात्रत्वमित्यतः
आह । मध्यआत्मनीति । आत्मनोदेहस्यजीवस्यवामध्येहृदयेतिष्ठतीत्युक्त्याहृदयस्यतत्तदंगुष्ठपरिमितत्वात्तत्रस्थोपितथोपच
र्यते । स्थानैक्येनगोष्ठेगावःएकीभूताइतिवदितिवातन्मात्रपरिमाणाभिव्यक्त्यावातथोच्यतइतिभावः । तदुक्तंसूत्रे । हृद्यपे
क्षयातुमनुष्याधिकारत्वादिति । पुरुषोजीवइतिभ्रमनिरासायगुणांतरमाह । ईशानइति । द्वंद्वैकवद्भावः । भूतभाविनोः

प्रेरकः । ततःहृदयस्थस्यप्रेरकत्वादेवतज्ज्ञानीनविजुगुप्सते । आत्मानंगोप्तुंनेच्छति । आत्मरक्षार्थंनप्रयतते । एतद्वैतत् । त्वयापृष्टंवस्तुएतद्वै । यदेवेहेत्यादिनोक्तगुणकंवैइति ॥ १२ ॥ उक्तानुवादेनगुणांतरमाह । अंगुष्ठेति । अधूमकःनिर्मलःसएवाद्यसउश्वःसएवश्वः । अनादिनित्यइत्यर्थः । एतद्वैतदितिप्राग्वत् ॥ १३ ॥ किंचनेतिवाक्यशेषेनानेतिनानाशब्देन भेदस्य इवशब्देनतद्विरुद्धस्याभेदस्यप्रतीत्याभेदाभेददर्शिनएवानर्थोक्तेभेददर्शिनस्तदनुक्तेःभेदएवास्तुधर्माणामित्यतोधर्मा

अंगुष्ठमात्रःपुरुषोज्योतिरिवाधूमकः । ईशानोभूतभव्यस्यसएवाद्यसउश्वः । एतद्वैतत् ॥ १३ ॥
यथोदकंदुर्गेवृष्टंपर्वतेषुविधावति । एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥ १४ ॥
यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवति । एवंमुनेर्विजानतआत्माभवतिगौतम ॥ १५ ॥

णांभेदज्ञानेअनर्थंस्पष्टयति । यथेति । पर्वतेषुदुर्गेऊर्ध्वभागेशिखरेवृष्टमुदकंयथाअधोविविधतयाधावतिगच्छति । एवं विष्णोर्धर्मान्पृथक्आश्रयादन्योन्यंवाभेदेनपश्यन्जानन्तानेवभेदेनदृष्टाननुतद्दर्शनानंतरमेवविधावतितमःप्राप्नोति ॥१४॥ ननुईश्वरस्यकथंप्रेरकत्वंमुक्तस्यतदनुप्रवेशेनतेनैक्यादित्यतोनैवमित्याह । यथेति । यथाशुद्धमुदकंशुद्धोदकेसिक्तंस्थापितंसत् तादृगेवभवति । ननुतदेववृद्धिदर्शनात् विजानतोमुनेःविजानतांमुनीनांआत्मास्वामीमुक्तश्चतुर्मुखःएवंभवतिभगवत्सदृशएवभवति । ननुतदैक्यमाप्नोति । जीवास्तुनाप्नुवंतीतिकिमुवक्तव्यमित्यर्थः। अतउक्तंयुक्तमितिभावः। गौतमेतिनचिकेतसःसंबोधनं १५

इतिश्रीकाठकार्थसंग्रहेद्वितीयाध्यायेप्रथमावल्ली ॥२॥१॥ देहादेःभगवदधीनत्वंज्ञात्वाममतांजह्यादितिभावेनतत्त्यागिनःसौख्य
माह । पुरमिति । एकादशद्वारंश्रोत्रद्वयंचक्षुर्द्वयंनासाद्वयंमुखंपायूपस्थेमनोबुद्धीचेत्येकादशद्वारं पुरंदेहंअवक्रचेतसःअज
स्यभगवतःसंबंधिनंतदधीनमनुष्ठायभगवदधीनतयानिश्चित्यममतात्यागीनशोचति । एवंनिश्चयेपिकथंशोकाभावइत्यतउक्तं ।
विमुक्तश्चेति । देहाभिमानाभावेनपामरवत्तत्कृतक्लेशशून्यतयाप्रागेवविमुक्तोपरोक्षज्ञानीदग्धपटायमानदेहादिमान्प्रारब्धा

द्वितीयाध्यायस्यप्रथमावल्ली ॥ २ । १ ॥

पुरमेकादशद्वारमजस्यावक्रचेतसः । अनुष्ठायनशोचतिविमुक्तश्चविमुच्यते । एतद्वैतत् ॥ १ ॥

हꣳसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् ॥ २ ॥

वसानेनिश्शेषतोविमुच्यते । मुख्यविमुक्तिमान्भवति । एतद्वैतत्त्वयापृष्टंतत्एतद्वै । देहेंद्रियादिनेतृत्वमुक्तिप्रदत्वगुणकंवैइति
॥१॥ हरेर्महिमांतरमाह । हंसइति । ओहाक्त्यागइतिअस्माड्डुमुप्रत्ययेटिलोपेहमितिरूपं । सारपदस्यांतलोपेविसर्गेह्रस्वेचसइतिरू
पं । हंचासौदोषहीनश्चासौसश्चसाररूपश्चेतिहंसः । नित्यंहीनोखिलैर्दोषैरित्यादिस्मृत्यानिरुक्तत्वेनयथायोगंप्रकृतिप्रत्ययाऊह्याः । ॥ २१ ॥
शुचौवायावस्तीतिशुचिषत् । वायुस्थः । शुचिशब्दोपपदादस्तेःशतृप्रत्ययेश्नसोरल्लोपइत्यकारलोपेषत्वेचशुचिषदितिरूपं । एवम

ग्रेपिबोध्यं । वंवरंसुसुखंयस्यसःवसुः । पूर्वपदेरशब्दलोपः । अंतरिक्षसत् अंतरिक्षगः । होता हुदानादनयोरित्यतःकर्तरितृच् ।
जुहोतिशब्दादिविषयानत्तिअनुभवतीति इंद्रियादिस्थः । वेद्यांपूज्यतयास्तीतिवेदिषत् । अतिअतिशयितंथमन्नंयस्यसोतिथः
सएवातिथिः । सोमरसपात्रेद्रोणकलशेतिष्ठतीतिदुरोणसत् । नृष्वस्तीतिनृषत् । वरेषुब्रह्मादिदेवेषुअस्तीतिवरसत् । ऋतेयथा
र्थरूपेवेदेअस्तीतिऋतसत् । व्योमसत्प्रकृतिस्थः । व्योतमस्यांजगदितिजगदाधारभूताश्रीःव्योमेत्युच्यते । विपूर्वाद्व्यीतंतुसं
तानइतिधातोःअधिकरणेमन्प्रत्ययेगुणेअंतलोपेव्योमेतिसिद्धेः । अप्सुजायंतइत्यब्जानितेष्वास्तइत्यब्जाः । अब्जशब्दोपपदा

ऊर्ध्वंप्राणमुन्नयत्यपानंप्रत्यगस्यति । मध्येवामनमासीनंविश्वेदेवाउपासते ॥ ३ ॥

दास्तेःक्विप्प्रत्ययेसकारस्यरुत्वेविसर्गेसवर्णदीर्घेचअब्जाइतिभवति । एवमग्रेपि । गोजाःगोषुजातेष्वास्तइतिगोजाः । ऋतेषुभगवं
तंप्राप्तेषुमुक्तेष्वितियावत् तेषुजातानिज्ञानादीनितत्रास्तइतिऋतजाः । अद्रिषुजातेषुआस्तइत्यद्रिजाः । ऋतंमुख्यतोवेदप्र
तिपाद्यं । पूर्णगुणत्वाद्बृहत् । एतद्वैतदिति । अत्रउत्तरत्रचानुषंजनीयं ॥ २ ॥ अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठती
त्युक्तोजीवइतिचोद्यंईशानइत्युत्तरार्धेनिरंकुशभूतभव्यसर्वप्रेरकत्वभगवल्लिंगेननिरस्तंप्राक् । अधुनाअंगुष्ठमात्रतयामध्येस्थि
तस्यव्यापारविशेषंवदन्नेववनिरवकाशवामनश्रुत्यादिनाचजीवइतिचोद्यंनिराह । ऊर्ध्वमिति । यत्तच्छब्दावत्रग्राह्यौ । योंगुष्ठ
मात्रत्वादिनाप्रागुक्तःप्राणंप्राणवायुंऊर्ध्वमुन्नयतिऊर्ध्वगतिमत्तयाप्रेरयति । अपानंचवायुंप्रत्यगधःविण्मूत्रादिनिष्कासनहे

तुतयाअस्यतिप्रेरयति । तंमध्येहृदिआसीनंवामनंविश्वेसर्वेदेवाःउपासतइति । एतेनप्राणापानप्रेरकत्वलिंगेनप्रागुक्तेशानोमुख्य प्राणइत्यपिचोद्यंनिरस्तं । निरवकाशवामनश्रुत्यादेः । सर्वप्रेरकेहरौशतेपंचाशन्न्यायेनप्राणापानप्रेरकत्वस्यापिसंभवात् । तथा चसूत्रं । शब्दादेवप्रमितइति ॥३॥ कांश्चिद्भगवद्गुणानुक्त्वातूष्णींस्थितंयमंपुनस्तद्गुणान्वक्तुंपृच्छतिनचिकेताः । अस्येति । शरी रस्थस्यअस्यदेहिनोजीवस्यविस्रंसमानस्यस्थूलंदेहंत्यजतःदेहात्सूक्ष्मदेहात्विमुच्यमानस्यतदपित्यजतः । अत्रमुक्तौनियामकंकिं

अस्यविस्रंसमानस्यशरीरस्थस्यदेहिनः । देहाद्विमुच्यमानस्यकिमत्रपरिशिष्यते । एतद्वैतत् ॥ ४ ॥
नप्राणेननापानेनमर्त्योजीवतिकश्चन । इतरेणतुजीवंतियस्मिन्नेतावुपाश्रितौ ॥ ५ ॥
हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं । यथामरणंप्राप्यात्माभवतिगौतम ॥ ६ ॥

कीदृशंपरिशिष्यतइतिप्रश्नः । उत्तरमाह । एतद्वैतदिति । त्वयापृष्टंतद्वस्तुएतद्वैवक्ष्यमाणगुणकतयापरिशिष्यमाणंवैइत्यर्थः ॥४॥ सर्वजीवनहेत्वोःमुख्यवायुरूपयोरपिप्रेरकत्वगुणंपरिशिष्यमाणस्याह । नेति । मुख्यप्राणरूपाभ्यांप्राणापानाभ्यांनजीवतिचेत नराशिःकिंत्वितरेण सकः यस्मिन्नेतौप्राणापानौउपाश्रितौतेनेतरेणेतिभगवत्प्रेरिताभ्यामेताभ्यांजीवतिनस्वतंत्राभ्यामितियाव त् । एतद्वैतदितिपूर्वेणान्वयः । सर्वजीवनदमुख्यप्राणप्रेरकत्वगुणयुक्तंवैतदिति ॥५॥ हंततइतिप्रतिज्ञावाक्यद्वयंस्वप्नांतमिति

मंत्रात्प्रागेवाकृष्यव्याख्यातं ॥ ६ ॥ तत्रब्रह्मगुणान्इयतानिरूप्योत्तरत्रापिजीवभेदकगुणान्ब्रह्मणोविवक्षुःइतरेणेतिपूर्वमंत्रेभेदस्यप्रस्तुतत्वात्तत्प्रकटनाय मरणंप्राप्यआत्माजीवोयथाभवतितच्चवक्ष्यामीत्युक्तंब्रह्मण्ययुक्तंधर्मंजीवस्याह । योनिमिति । देहिनोदेहधारणयोग्याःअन्येकेचनजीवाःशरीरत्वाय अर्शआद्यच्प्रत्ययांतात्त्वप्रत्ययः । शरीरवत्वाययोनिंप्रपद्यंतेप्राप्नुवंति । कथं । यथाकर्मयथाश्रुतं । स्वस्वविद्याकर्मानतिक्रमेण । अन्येदेहिनःस्थाणुंस्थावरंदेहंसंयंतिस्वकीयकर्माद्यनुसारेणेति ॥ ७ ॥

योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः । स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतं ॥ ७ ॥
यएषुसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्ममाणः । तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते ॥
तस्मिँल्लोकाःश्रिताःसर्वेतदुनात्येतिकश्चन । एतद्वैतत् ॥ ८ ॥

अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव ।

जीवभेदकगुणयुक्तत्वेनभगवतोमहिमानमाह । यएषइति । यएषपुरुषोभगवान्सुप्तेषुजीवेषुकामंकामंस्वेच्छानुसारेणेतिवा काम्यमानंस्वाप्नपदार्थजातमितिवार्थः । निर्ममाणःउत्पादयन्जागर्ति । तदाहसूत्रे । निर्मातारंचैकेपुत्रादयश्चेति । तदेवेतिविधेयापेक्षयानपुंसकत्वं । शुक्रंशोकरहितंतद्ब्रह्मतदेवामृतमनश्वरमुच्यतेवेदादिषुप्राज्ञैरितिवा । तस्मिन्निितिमहिमांतरं । एतद्वैतत्त्वयापृष्टंतत्यएषइत्यादिनोक्तगुणकंवै ॥८॥ नप्राणेनेत्युक्तंसर्वजीवनियंतृत्वंदृष्टांताभ्यांव्यनक्ति । अग्निर्यथेत्यादिनामंत्रद्वयेन ।

भुवनंप्रविष्टः चेतनोग्निःयथैकःपाकादिकर्तानान्यः। तथाप्यस्यचेतनाग्नेःरूपंरूपंप्रतीतिशेषः। प्रतीत्यस्यावृत्तिर्वा । रूपंरूपंप्रतिप्र
तिरूपःप्रतिबिंबोबभूव। भूताग्निःअचेतनवह्न्यंशाःचेतनवह्न्यंशप्रतिबिंबकाः।तत्तन्नियतत्वेसतितत्सदृशाइतियावत्। तथासर्व
भूतांतरात्मासर्वजीवानुप्रविष्टोभगवानेकःस्वतंत्रोनान्यः । अस्यभगवतोरूपंरूपंप्रतिप्रतिरूपोप्रतिबिंबोबभूवजीवः। द्वयोरपियो
निमित्यादिनाप्रकृतत्वात्। तदाहसूत्रे। आभासएवचेति । प्रतिबिंबत्वंचतदधीनत्वेसतिकिंचित्तत्सदृशत्वंज्ञेयं । किंतयोरभेदः

एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्च ॥ ९ ॥
वायुर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव ।
एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्च ॥ १० ॥
सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः ।
एकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यः ॥ ११ ॥

नेत्याह । बहिश्चेति । बिंबस्वरूपाद्बहिर्भूतश्च नतत्स्वरूपात्मेत्यर्थः॥ ९ ॥ वायुर्यथेति ॥ यथाचेतनवायुरित्यादिरूपेणप्राग्वद्यो
जना ॥१०॥ क्लिश्यमानजगदंतःप्रविष्टस्यापिक्लेशःस्यादितिचोद्यंसदृष्टांतंनिराह । सूर्योयथेति । चक्षुर्द्विविधं । बाह्यमांतरंचेति । ॥ २३ ॥
बाह्यंजडं। आंतरंतुतदभिमानिसूर्यचेतनरूपं । आदित्यश्चक्षुर्भूत्वाऽक्षिणीप्राविशदित्यादेः । तथाचयथासूर्यःसर्वलोकस्यचक्षुः

चक्षुर्नियंतृतयाचक्षुर्नामकःचक्षुरंतस्थःसन्नपिचाक्षुषैःबाह्यदोषैःबाह्यचक्षुस्संबंधिभिःदोषैर्नलिप्यते । तथैकःस्वतंत्रःबाह्योजीव
स्वरूपानात्मकःबहिर्भूतस्सन्नलिप्यतेस्वतंत्रत्वादितिभावः। तदाहसूत्रेसंभोगप्राप्तिरितिचेन्नवैशेष्यादिति ॥११॥ एकपदोक्तंस्वा
तंत्र्यंव्यंजयन्एकस्यनानाजीवनियंतृत्वंकथमितिचोद्यंबहुरूपत्वोक्त्यानिराह। एकोवशीति। कैमुत्येनापिभगवतोदुःखास्पृष्टत्व
माह । तमिति । येआत्मस्थंपश्यंतितेषामपिसर्वदुःखप्रहाणेनशाश्वतंसुखंकिलतस्यहरेःकथंदुःखस्पर्शइतिभावः ॥१२॥ एकोव

एकोवशीसर्वभूतांतरात्माएकंरूपंबहुधायःकरोति ।
तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषां ॥ १२ ॥
नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान् ।
तमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषां ॥ १३ ॥
तदेतदितिमन्यंतेऽनिर्देश्यंपरमंसुखं । कथंनुतद्विजानीयांकिमुभातिनभातिवा ॥ १४ ॥

शीत्युक्तंस्वातंत्र्यंसमर्थयते । नित्यइति । नित्यानांवस्तूनांनित्योतिशयेननित्यः । चेतनानांचेतनोमुख्यचेतनः । अन्येचेतना
भासाःतदधीनाइतियावत् । परमचेतनत्वात्स्वतंत्रः । स्वतंत्रत्वाद्दुःखाश्लेषइतिभावः । बहूनांचेतनानांशांतिःसुखं ॥ १३ ॥
भगवतोमहिमांतरमाह । तदेतदिति । तद्ब्रह्मब्रह्मेत्युपक्रांतंएतदेकंरूपमितिमध्येचोक्तंब्रह्मणोरूपमनिर्देश्यमिदमित्थमितिनि

दैष्टुमशक्यं। परमंसुखंअनिर्देश्यपरमसुखात्मकमिति(एनं)ज्ञानिनोमन्यंते तत्तादृक्सुखात्मकं भगवद्रूपंकथंनुजानीयांतत्प्रसाद मृते । किमुभातिनभातिवेति । टीकायांतुयदनिर्देश्यंसुखंकथंनुतद्विजानीयामित्यानुकूल्येनगृह्णंतितदनिर्देश्यंसुखंएतत्प्रकृत मात्मनोरूपमितिमन्यंतइतियोजनोक्ता । जानीयामितिप्रार्थनायांलिङ् । ज्ञानार्थप्रार्थिततत्वमानुकूल्येनग्रहणं ॥ १४ ॥ तस्यमहिमांतरमाह । नतत्रेति । तत्रकथंनुतद्विजानीयामित्यत्रतत्पदोक्तज्ञानार्थंप्रार्थितेवस्तुनिसूर्यादिर्नभातिनभासयते । चंद्रतारकमितिद्वंद्वैकवद्भावः । तमेवभांतमनुतद्भानमनुसृत्यसर्वेसूर्यादितेजोजातंभाति ॥ तस्यभासासर्वमिदंजगत्विभा

नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः ।
तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति ॥ १५ ॥ द्वितीयावल्ली ॥ २ । २ ॥

ऊर्ध्वमूलोऽवाक्शाखएषोश्वत्थःसनातनः । तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते ।
तस्मिँल्लोकाश्रिताःसर्वेतदुनात्येतिकश्चन । एतद्वैतत् ॥ १ ॥

तीति । तथाचसूत्रं । अनुकृतेस्तस्यचेति ॥ १५ ॥ इतिश्रीकाठकार्थसंग्रहेद्वितीयाध्यायेद्वितीयावल्ली ॥ २ ॥ २ ॥ ॥ ६ ॥ साधूनांभगवन्महिम्नोबुद्ध्यारोहायलोकप्रसिद्धार्थसाम्येनतन्महिमानमाह । ऊर्ध्वेति । ऊर्ध्वःसर्वोच्चोभगवान्मूलं वृक्षमूलंभूतलमिवमूलंयस्यजगदाख्यवृक्षस्यसऊर्ध्वमूलः । अर्वाक्अर्वांचःअधमाःदेवाःशाखाःयस्यासौअर्वाक्शाखः । भू

॥ २४ ॥

मिगतवृक्षमूलंतुश्रीतत्वंज्ञेयं । एषःप्रमाणप्रमितोजगदाख्योश्वत्थःअश्वत्थतरुरिवस्थितः । आशुगतिमत्त्वादश्वोहरिः । आशू
पपदात्वाधातोःकप्रत्ययेउपपदांतलोपेह्रस्वत्वेचअश्वइतिसिद्धेः । अश्वःअस्मिंस्तिष्ठतीतिवा अश्वस्यथमन्नमितिवाश्वत्थः ।
सनातनः । प्रवाहतोनादिः । तदेवऊर्ध्वाख्यंमूलमेवशुक्रं । व्याख्यातानिपदानि । एतद्वैततूत्वयापृष्टं । एतादृशगुणकंवै
इति ॥ १ ॥ यदिदमिति । यदिदंकिंचसर्वंजगत्प्राणाख्येहरौस्थितंप्राणान्निस्सृतंततदिदंजगत् यस्मादेजतियत्प्रेरणयाचेष्टते
तत्वज्रंवज्रवत्महद्भयंमहद्भयदंउद्यतंउत्कृष्टयत्नवंतंएततएतंयेविदुःतेअमृताःमुक्ताभवंति । भाष्यटीकयोस्तुप्राणःसर्वमिदं

यदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतं । महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंति ॥ २ ॥
भयादस्याग्निस्तपतिभयात्तपतिसूर्यः । भयादिंद्रश्चवायुश्चमृत्युर्धावतिपंचमः ॥ ३ ॥
इहचेदशकद्बोद्धुंप्राक्शरीरस्यविस्रसः । ततःस्वर्गेषुलोकेषुशरीरत्वायकल्पते ॥ ४ ॥

किंचजगच्चयस्मान्निस्सृतंएजतिचेष्टतेचसर्वंजगद्यस्मान्निस्सृतंसप्राणोयस्माच्चेष्टतइतिवार्थः । वज्रपदस्यतुवर्जनाद्वज्रमुच्यतइ
तिस्मृत्यायोगरूढिभ्यांचवज्रशब्दार्थोभगवानित्युक्तं । तदाहसूत्रकारःकंपनादिति ॥ २ ॥ वज्रवद्भयदत्वंकुतइत्यतआह ।
भयादिति । इंद्रोवायुःपंचमोमृत्युःवर्षणादिस्वकार्येषुधावतिव्याप्रियते ॥ धाउगतिशुध्योः ॥ ३ ॥ बाल्यएवसंपादितज्ञानंनचि
केतसंदृष्ट्वाविस्मितोन्योप्येवंकुर्यादित्याशयवान्तथाकर्तुःफलमाह । इहचेदिति । इहमनुष्यदेहेशरीरस्यभौतिकदेहस्यविस्रसः
विस्रंसनात् । पतनावस्थानात्प्राक्बोद्धुमशकत्शक्तश्चेत्सःस्वर्गेषुलोकेषुवैकुंठादिषुशरीरत्वायअप्राकृतचिदानंदात्मकदेहव

त्वायकल्पते मुक्तोभवतीतियावत् ॥ ४ ॥ उक्तोपायैर्जायमानोपिभगवद्बोधोनैकविधइत्याह । यथेति । आत्मनिजीवेऽवस्थि
तोभगवान् आदर्शेदर्पणेमुखंयथादृश्यतेसम्यक्तथाज्ञानदृष्टिभिःदृश्यते । यथास्वप्नेपदार्थोदृश्यतेतथापितृलोकेदृश्यतेनस
म्यगित्यर्थः। यथाप्सुपरीवसम्यगिवप्रतिमुखादिकंदृश्यतेतथागंधर्वलोकेकिंचित्स्पष्टतयादृश्यते। ब्रह्मलोकेतुछायातपयोःछाया
तपमिलितप्रदेशेवस्तुयथाहनिदृश्यतेतथाहरिर्दृश्यतइत्यर्थः ॥ ५ ॥ इहचेदशकद्बोद्धुंइत्युक्तं । तत्रकस्यबोधात्स्वर्गलोकोभव

यथादर्शेतथात्मनियथास्वप्नेतथापितृलोके ।
यथाप्सुपरीवदृश्यतेतथागंधर्वलोके । छायातपयोरिवब्रह्मलोके ॥ ५ ॥
इंद्रियाणांपृथग्भावमुदयास्तमयौचयत् । पृथगुत्पद्यमानानांमत्वाधीरोनशोचति ॥ ६ ॥
इंद्रियेभ्यःपरंमनोमनसःसत्वमुत्तमं । सत्वादधिमहानात्मामहतोऽव्यक्तमुत्तमं ॥ ७ ॥
अव्यक्तात्तुपरःपुरुषोव्यापकोलिंगएवच । तंज्ञात्वामुच्यतेजंतुरमृतत्वंचगच्छति ॥ ८ ॥

तीत्यतोबोद्धव्यमाह । इंद्रियाणामिति । पृथग्भावंतारतम्यंयच्चजगदुदयास्तमयौभवतःपृथक्नानाप्रकारेणोत्पद्यमानानांइंद्रि
याणांसत्ताप्रतीत्यादिकमितिशेषः । मत्वाभगवदधीनंज्ञात्वानशोचति ॥ ६ ॥ नैतावदेवकिंतुतारतम्यांतगत्वेनभगवज्ज्ञानमा
वश्यकमित्याह । इंद्रियेभ्यइत्यादिना । इंद्रियादिदेवताःप्राक्तृतीयेप्रदर्शिताः । सत्वंबुद्धिःअधिअधिकःव्यापकोऽपरिच्छिन्नः।
अलिंगःप्राकृतभौतिकदेहरहितः । विशेषणसमुच्चयेचशब्दः । तःतारतम्यांतगंज्ञात्वामुच्यतेभवपाशात् । अमृतत्वंचपुनर्जन

नमरणादिभावरूपममृतत्वंचगच्छतीत्यर्थः । प्रागुक्तस्यैवतारतम्यस्यपुनरिहवचनंतारतम्यज्ञानपूर्वकंभगवतःसर्वोत्तमत्वज्ञान
एवसर्ववाक्यानांमहातात्पर्यमितिज्ञापयितुं ॥ ७ ॥ ८ ॥ तंज्ञात्वामुच्यतेइत्युक्तंमुक्तिहेतुज्ञानंनचक्षुरादिनाऽनायाससाध्यं ।
किंतुभक्तिश्रवणाद्युपोद्बलितेनमनसैवेत्याह । नसंदृशइति । संदृशेसम्यक्ज्ञानाय । अस्यनानावतारनिदानभूतस्यमूलरूपस्य
प्रकृतभगवतोरूपंनतिष्ठति । अव्यक्तैकस्वभावत्वात्। अचिंत्यमहिमत्वाच्च । वस्तुस्वभावोदुर्दर्शइत्युक्त्वाकरणान्यपिनतत्रश
क्तिमंतीत्याह । नचक्षुषेति । उपलक्षणं । चक्षुरादिकरणैःकश्चिदप्येनंनपश्यति। एतेनमत्स्यकूर्मादेश्चक्षुषादर्शनान्नचक्षुषापश्य

नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चिदेनं ।
हृदामनीषामनसाभिकॢप्तोयएनंविदुरमृतास्तेभवंति ॥ ९ ॥
यदापंचावतिष्ठंतेज्ञानानिमनसासह । बुद्धिश्चनविचेष्टतितामाहुःपरमांगतिं ॥ १० ॥

तीतिकथमितिपरास्तं । मूलरूपस्यैवंभावोक्तेः । तर्हिकेनेत्यतआह । हृदेति । हृच्छब्दोत्रश्रवणमननध्यानभक्त्यादिसाधनपरः ।
तद्युक्तेनमनसामनीषाज्ञानरूपोभगवानभिकॢप्तोविषयीकृतोभवति । मुच्यतेमुक्तोभवतीतिप्रागेकवचनोक्त्याज्ञानिष्वेकएवमु
च्यतइतिप्राप्तशंकांवारयितुंआह । यएनमिति । एनंपुरुषं । तथाचसूत्रं । अनियमःसर्वेषामिति ॥ ९ ॥ हृदामनसेत्यत्रहृदेत्यु
क्तसाधनेषुअभ्यर्हितंज्ञानसाधनंकिमित्यतःप्रत्याहारसिद्धधारणादिरूपंध्यानमित्याह । यदेति । ज्ञानानि । करणेल्युट् । ज्ञा
नसाधनानिचक्षुरादिपंचेंद्रियाणिमनसासहयदावतिष्ठंते । विषयेभ्यःव्यावृत्ततयातिष्ठंति । बुद्धिश्चनविचेष्टते । विषयान्प्रति

नप्रवर्ततेतंसप्तानामिंद्रियाणांविषयेभ्यःप्रत्याहारंपरमांगातिंपरमसाधनंज्ञानस्याहुरित्यर्थः । तामितिपाठेगत्यपेक्षयास्त्रीलिंगत्वं ॥ १० ॥ ननुकथंप्रत्याहारस्यपरमसाधनताध्यानसमाधिलक्षणयोगस्यैवतथात्वादित्यतआह । तांयोगमितीति । तामित्यस्य विवरणंस्थिरामिंद्रियधारणामिति । इंद्रियाणांविषयेभ्योव्यावर्तनेनभगवद्विषयेअचंचलांधारणामेवध्यानसमाधिलक्षणयोग मितिमन्यंतेप्राज्ञाइति । तयोरनतिभेदंव्यनक्ति । अप्रमत्तइति । तथासत्यप्रमत्तोभवतिभगवज्ज्ञान्येवभवतीत्यर्थः । योगंम न्यंतइत्युक्तं । तस्यविषयमाह । योगोहीति । प्रभवाप्ययौ । उत्पत्तिविनाशौ । जगतोभगवत्सकाशाद्भवतइत्येतद्योगोहिध्या

तांयोगमितिमन्यंतेस्थिरामिंद्रियधारणां । अप्रमत्तस्तदाभवतियोगोहिप्रभवाप्ययौ ॥ ११ ॥

नैववाचानमनसाप्राप्तुंशक्योनचक्षुषा । अस्तीतिब्रुवतोन्यत्रकथंतदुपलभ्यते ॥ १२ ॥

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनचोभयोः । अस्तीत्येवोपलब्धस्यनत्वभावःप्रसीदति ॥ १३ ॥

नरूपभगवद्योगविषयोहीति ॥ ११ ॥ चक्षुषापश्यतीत्युपलक्षणत्वेनोक्तंविशदयति । नैववाचेति । प्राप्तुंज्ञातुंनशक्यःपुरुषइ त्यनुकर्षः । केनतर्हिज्ञेयइत्यतोहृदेत्यादिनाश्रवणादिकंपरमसाधनमुक्तं । तस्यगुरुप्रसादरूपेतिकर्तव्यतांव्यतिरेकमुखेनाह । अस्तीति । अपराधीनतयासर्वोत्तमत्वेनअस्तिप्रकृतपुरुषनामाभगवानितिब्रुवतःउपदिशतोगुरोःअन्यत्रतथोपदेष्टृगुरुंविनेतिया वत् । तद्भगवतोरूपंकथमुपलभ्यतेनकथमपि । गुरुणाप्रीतिपूर्वमुपदेशेकृतेश्रवणमननादिस्वप्रयत्नेनगुरुप्रदानसहितेनोपलभ्य तेभगवानिति । तदाहसूत्रकारःप्रदानवदेवहितदुक्तमिति ॥ १२ ॥ सेतिकर्तव्यताकश्रवणादिस्वप्रयत्नमात्रादेवनोपलभ्यते ।

किंतुतज्जन्यभगवत्प्रसादादेवेतिभावेनतद्धेतूक्तिपूर्वकमाह । अस्तीत्येवेति । उभयोःप्रकृतिपुरुषयोःतत्वंप्रामाणिकत्वंप्रकृतिपुरुषभावंवाभावयतिसंपादयतीतितत्वभावोभगवान्तेनतत्प्रसादेनेतियावत् । सर्वस्मादधिकतयाअस्तीत्येवज्ञातव्यः । पुरुषइत्यनुषंगः । नतुतत्प्रसादेनविना । मुक्तिहेतुर्भगवत्प्रसादश्चतत्प्रसादजन्येश्वरविषयोपलंभादित्याह । अस्तीत्येवेति । सर्वाधिकतयास्तित्वादस्तीतिनामाभगवान्इत्युपलब्धस्यकर्तरिनिष्ठा । एवमुपलभमानस्यतत्वभावः। प्रागुक्तव्युत्पत्त्याभगवान्प्रसीदतिपरमप्रसादवान्भवति ॥१३॥ तादृशप्रसादसाध्यंफलमाह । यदेति । परमप्रसादेसतिपश्चाद्येहृदिस्थिताःअंतःकरणगताःसर्वे

यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः । अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते ॥ १४ ॥

यदासर्वेप्रभिद्यंतेहृदयस्येहग्रंथयः । अथमर्त्योऽमृतोभवतिएतावदनुशासनं ॥ १५ ॥

शतंचैकाचहृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतैका ।

कामाःतेयदाप्रमुच्यंते । कर्मकर्तरिप्रयोगः।मुक्ताभवंति । अपगच्छंतीतियावत् । अथअनंतरंमर्त्योऽमृतोभवति । मृतिंनैवप्रपद्यते । कुतःअत्रश्वेतद्वीपादिस्थानविशेषेब्रह्मसमश्नुते । प्राप्नोति । तस्मादितियोज्यं ॥ १४ ॥ हृदयगतसर्वकामत्यागःकदेत्यतः तत्कारणाविद्याहंकारकर्मणांहृदयग्रंथीनांयदात्यागःतदेत्याह । यदेति । इहमानुषदेहेहृदयस्यसर्वेग्रंथयोहृदयस्थाविद्यादिग्रंथयोयदाप्रभिद्यंते । अपयांतिअथतदासर्वकामप्रहाणेनमर्त्यःअमृतोमुक्तोभवति । एतावदनुशासनं । निष्कामकर्मश्रवणमनन ध्यानकर्तव्योक्तिपरंशास्त्रमेतावत् ॥ १५ ॥ एवंमोक्षहेतुब्रह्मविद्यामुक्त्वाज्ञानिनःचरमदेहान्निष्क्रमणेअवश्यंपूर्वंध्येयमार्गंआ

ह । शतमित्यादिना । हृदयस्यहृदयसंबंधिन्योनाड्यःशतंचैकाचएकोत्तरशतंनाड्योभवंति । तासांमध्येएकानाडीमूर्धानमभिप्रतिनिस्सृतातावत्पर्यंतंगता । तयाशतोत्तरयासुषुम्नाख्ययाऊर्ध्वंगच्छन्अमृतत्वमेति । अन्याश्चशतंनाड्यःविष्वगुत्क्रमणे लोकांतरगमनार्थंभवंति । सुषुम्नामार्गोज्ञानिनांध्येयइतिभावः । तदाहसूत्रकारः । गत्यनुस्मृतियोगाच्चहार्दानुगृहीतःशताधिकयेति ॥ १६ ॥ अनन्यप्रोक्तेगतिरत्रनास्तीत्यादिनोक्तंभेदज्ञानमेवमुक्तिहेतुरित्युपसंहरति । अंगुष्ठमात्रइति । अंतरा

तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंति ॥ १६ ॥
अंगुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टः ।
तंस्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकांधैर्येण ।
तंविद्याच्छुक्रममृतंतंविद्याच्छुक्रममृतमिति ॥ १७ ॥

त्माअंतर्व्याप्तइतिवा अंतःप्रेरकइतिवार्थः । जनानांमानुषादिचेतनानांहृदयेसदासम्यक्सुखेनैवनिविष्टःस्थितःतंस्वात्स्वात्मरूपात्शरीरादुपलक्षणं जीवादितियावत् । यद्वास्वात्स्वकीयाज्जीवरूपाच्छरीरादित्यर्थः । जीवोहिहरिवशत्वात्हरिणाधिष्ठितत्वाद्धरेःशरीरं । धैर्येणधीरभावेनसूक्ष्मदृष्ट्येतियावत् । प्रवृहेद्विवेचयेत्भेदेनजानीयादितियावत् । कथंमुंजादिवेषीकांमुंजापदेनमौंजीधारणार्थंक्रियमाणरज्जुसाधनतृणविशेषः । मुंजात्मुंजपुंजमध्यात्इषीकाख्यविजातीयतृणविशेषमिवेति । यत्तुसुधायांदेहात्मत्वंयदिनतदितीतिभक्तिपादीयानुव्याख्यानगमनिकायांदेहजीवपरतयाव्याख्यातंतत्पररीत्यैवेत्य

विरोधः । मुमुक्षोःशोकराहित्यस्यअमृतत्वस्यचावश्यापेक्षितत्वात्तस्यतादृक्त्वेनभगवज्ज्ञानेनैवभाव्यत्वात्तज्ज्ञानमावश्यकमितिभावेनाह । तमिति । तंजीवाद्भिन्नंशुक्रंशोकादिदोषवर्जितं । अमृतंनित्यमुक्तं । अनाद्यनंतकालंसंपूर्णस्वरूपानंदानुभववंतमितियावत् । तादृशानुभवस्यैवमुक्तिशब्दार्थत्वात् । विद्याज्जानीयादिति । अभ्यासस्तात्पर्यार्थः । इतिशब्दोवेदनप्रकारवाचीवासमाप्तिवाचीवाध्येयः ॥ १७ ॥ एवंब्रह्मविद्यांप्राप्यनाचिकेतःकिमभूदित्यतोवेदपुरुषोवक्ति । मृत्युप्रोक्तामिति ।

मृत्युप्रोक्तांनाचिकेतोथलब्ध्वाविद्यामेतांयोगविधिंचकृत्स्नं ।
ब्रह्मप्राप्तोविरजोभूद्विमृत्युरन्योप्येवंयोविदध्यात्ममेव ॥ १८ ॥ २ । ३ ॥
इतिश्रीकाठकोपनिषत्संपूर्णा ॥

कृत्स्नंयोगविधिंचप्रत्याहारादिभगवज्ज्ञानोपायविधिंचलब्ध्वाअनुष्ठायविरजोनिष्पापस्सन्ब्रह्मप्राप्नोति । विमृत्युरपगतमृत्युःअमृतोभूत् । अन्योपियोध्यात्मवित्सोप्येवमेवभवत्येवेति ॥ १८ ॥ निर्दोषगुणपूर्णायदोषदूरायविष्णवे ॥ नमःश्रीप्राणनाथायभक्ताभीष्टप्रदायिने ॥ इतिश्रीकाठकार्थानांसंग्रहोकारियन्मया । राघवेंद्रेणयतिनाप्रीयतांतेनकेशवः ॥ इतिश्रीराघवेंद्रयतिकृतकाठकोपनिषत्खंडार्थःसंपूर्णः ॥

(अयं ग्रंथः अ० रामाचार्य, टी. आर्. कृष्णाचार्यनामभ्यां मुंबय्यां निर्णयसागरमुद्रणयंत्रे मुद्रयित्वा प्रकाशितः । शके १८१८)

॥ काठकोपनिषत्खंडार्थःसंपूर्णः ॥